# षष्ठः सर्गः ।

[1][पूर्वसर्गे प्रथमम्[2] इन्द्रादीनां दमयन्तीस्वयंवरोत्कण्ठापुरःसरं पृथिव्यां गमनानन्तरं रम्भाद्यप्सरसां च मानग्लानिम्[3] अभिधाय तदनु तेषामेव नलदर्शनेन विस्मितानां छल[4]लक्षणेन गूढाभिसन्धिना प्रथमं[5] प्रार्थनाङ्गीकारम् उपवर्ण्य ततस्तस्याऽभिसन्धेरुद्घाटने नलाङ्गीकारं स्मृतिशास्त्रोपदेशेन दातृगुणवर्णनया परोहत्य बलादकीर्तिप्रत्यवायादि[6]भयात् दूतत्वे प्रतिश्रुते दूतगुणान् धर्म[7]शास्त्रद्वारेण दर्शयितुं कविः षष्ठं सर्गमारभते ॥]

दूत्याय दैत्यारिपतेः प्रवृत्तो द्विषां निषेद्धा निषधप्रधानः ।
मी/ स भीमभूमीपतिराजधानीं लक्षीचकाराऽथ रथस्यदस्य ॥१॥

[2][दूत्यायेति । अथ दूतत्वाङ्गीकृतेरनन्तरं स निषध[2]प्रधानः नलः दैत्यारीणां देवानां पत्युरिन्द्रस्य दूत्याय प्रवृत्तः सन् भीमाख्यस्य भूमीपतेर्नृपस्य राजधानीं विदर्भां रथस्यदस्य[3] लक्षीचकार वेगविषयां[4] चक्रे । यतो द्विषां निषेद्धा । अन्यथा भीमस्य भयङ्करस्य नगर्यां कथम् एकाकी[5] रथेन गच्छेत्[6] ॥१॥]

1 P. ॐ नमः श्रीशारदायै ॥ P2 ~~ॐ~~ ॐ नमः शिवाय ॥ श्रीः ॥ 2 P. गमनं 3 P2 ०म्लानि० 4 P2 छलन० 5 P2 प्रथमा 6 P1 ०प्रत्यवादि० 7 P2 om. धर्म० ॥ 1 P. दूत्यायेत्यादि । 2 P2 निषधानां 3 P. om. रथवेगस्य 4 P. ०विषयं 5 P2 एकाकी कथं 6 P. add. दूत्यं तद्भावकर्मणी (अमर० II.viii.32) । दूतवणिग्भ्यां चेति वक्तव्यम् । यत् स्त्रीबो प्रधानम् । उपजातिवृत्तम् ॥ P2 lecto sup. lin.
(वा० 434)

सर्ग ६ 2

भैम्या समं नाजगणद्वियोगं स द्रुतधर्मे स्थिरधीरधीशः।
पयोधिपाने मुनिरन्तरायं दुर्वारमप्यौर्वमिवौर्वशेयः॥२॥

[भैम्या[1] सममिति। सो[2]ऽधीशो द्रुतधर्मे स्थिरधीः सन् भैम्या समं वियोगम[3]न्तरायं नाऽजगणत्।[4] उर्वश्या अपत्यं मुनिरग[5]स्त्यः/स्त्य व/ [6]पयोधिपाने दुर्वारमपि और्वं वाडवानलं यथाऽन्तरायं विघ्नरूपं नाऽजगणत्। और्वशेयो मै[7]त्रावरुण इत्यर्थः। यदुक्तमनुक्रमण्याम्— [8]मित्रावरुणयोर्दीक्षितयोरुर्वशीमप्सरसं दृष्ट्वा वासतीवरे(?) कुम्भे रेतोऽपतत्ततोऽगस्त्यवसिष्ठावजायेतामिति [9]। गति[1] उरु[10] प्रचुरम् अश्नाति भुङ्क्ते[11] उर्वशी तस्याः पुत्रस्य[12] बहुभोजित्वा न गणना[13]॥२॥

बलप्रणालीमिलदम्बुजालीसंवादपीयूषपिपासवस्ते।
तदध्ववीक्षार्थमिवाऽनिमेषा देशस्य तस्याऽऽभरणीबभूवुः॥३॥

[बिल[1]प्रणालीति। ते[2] देवाः तस्य देशस्याऽऽभरणीबभूवुः।

Contd. ms. add. प्रधानमित्याविष्टलिङ्गत्वम्। द्विषामिति कर्मणि षष्ठी॥१॥

1 f. भैम्या। 2 f2 सोऽ° 3 f2 om. अन्तरायं 4 f1 add. यत् 5 f1 °रगस्त्यः 6 f2 पयोधेः 7 f2 मित्रा° 8 f2 मैत्रा° 9 f1 add. अत्रेतिहासः— प्राजापत्यो मरीचिर्हि मरीचेः काश्यपोऽभवत्। तस्य देव्योऽभवन् जाया दक्षायण्य- स्त्रयोदश॥ तासु देवासुराश्चैव गन्धर्वाः पन्नगोरगाः। वयांसि च पिशा- चाश्च जज्ञिरेऽन्याश्च जातयः॥ तत्र त्वेकाऽदितिर्देवी द्वादशाऽजनयत् सुतान्[?]॥ इन्द्रं तस्यास्ततो जज्ञे मित्रं च वरुणं च ह॥ तयोरागतयोः साऽत्र दृष्ट्वाऽप्सरसमुर्वशीम्। रेतश्च स्कन्द[यन्] कुम्भेऽप्यपप्तद्वासती- वरे॥ तेनैव तु मुहूर्तेन वीर्यवन्तौ यशस्विनौ। अगस्त्यश्च वसिष्ठश्च भ्रातरौ संबभूवतुः॥ उदियाय ततोऽगस्त्यः शम्यामात्रो महातपाः। मानेन (?) संमितो यस्मात्तस्मान्मान्य इहोच्यते॥ यद्वा कुम्भादृषिर्जातः कुम्भे वाऽपि Contd.

सर्ग ६ 3

राजधानीत्वेऽणदेशस्य समीपे आगत्य रहिता परमं अनिमेषा। उते - अतो - तस्य नलस्य ध्वनो वीतार्थमिव निमेषरहिता ॥ किंभूता ?॥ नलप्रणाल्या नलद्वारेण मिलन् योऽम्बुजाक्ष्या दमयन्त्याः संवादः स एव पीयूषममृतं तत्र पिपासवः ॥३॥

तां कुण्डिनाख्यापदमात्रगुप्तामिन्द्रस्य भूमेरमरावतीं सः।
मनोरथः सिद्धिमिव क्षणेन रथस्तदीयः पुरमाससाद ॥४॥

तां कुण्डिनेति। तदीयः नलसम्बन्धी स रथस्तां भूमेरिन्द्रस्य भीमस्य राज्ञः अमरावतीं विदर्भां क्षणेन आससाद। किंभूताम् ?। कुण्डिन इत्याख्यापदमात्रेण नाममात्रेण गुप्तां छन्नाम्। क इव। मनोरथ इव। यथा स क्षणेन सिद्धिं प्राप्नोति तथा पुरं प्राप। ॥४॥

भैमीपदस्पर्शकृतार्थरथ्यां सेयं पुरीत्युत्कलिकाकुलस्ताम्।
नृपो निपीय क्षणमीक्षणाभ्यां भृशं निशश्वास सुरैः अतारीः ॥५॥

contd हि मीयते ~~...~~ कुम्भ इत्यभिधानं तु परिमाणं तु दृश्यते ॥ (बृहद्दे॰ ६७-६८) ॥ इति प्रासङ्गिकोऽगस्त्यवाचकमान्यशब्देतिहासः। कालिदासस्यापि ~~र~~ रघुनाथोऽप्यगस्त्येन मानसं दर्शितात्मने (रघु॰ ...) इति। केचित्पठन्ति - मानं कुम्भ इत्यर्थः। 10 ॥ 2 अनु ॥ 1 । भूक्षे 12 । om. पुत्रस्य 13 । add. अनुप्रास उपमा। दृतधर्मे स्थिरधीरित्यनेकपदार्थो हेतुश्च ॥२॥ 1 । नलो 2 । add. अपि 3 । om. राज॰ समीपे 4 । add. यस्मिन्देशे नलो मिलितस्तत्रैवाऽऽगमनभूता स्थिता इति वा 5 । om परम् अनिमेषाः 6 । नल एव प्रणाली जलनिर्गमनमार्गो मकरमुखादिस्तत्र मिलन् 7 । add. रसादिकं हि प्रणाल्या मिलति द्वयोः प्रणालीपयसः पदव्याम् अलो स्त्रीनपुंसकयोरादुः। रूपकमुत्प्रेक्षा च ॥३॥ 1 । तां कुण्डि 2 । तदीयः - सम्बन्धी bold किंभूताम् ? 3 । क्षणेन विदर्भाम् 4 । add. किंभूता ? 5 । add. व्यतिरेको रूपकमुपमा चानुप्रासोऽपि ॥ ४ ॥

सर्ग ६ 4

[भैमीपदेति[1]। स नृपः तां पुरीं प्राणम् ईक्षणाभ्यां निपीय भृशं निश्वास[2]। किंभूतः? स्फुरैः क्षता भग्ना आशा यस्य स तथा। किंभूतः? इति उत्कलिकया उत्कण्ठतया आकुलः। इतीति किम्[3]? सा इयं पुरी भैम्याः पदस्पर्शोत्करणभ्रमणेन कृतार्था रथ्या यस्याः सा तथा[4] ॥५॥]

स्विद्यत्प्रमोदाश्रुलवेन वामं रोमाञ्चभृत्पक्ष्मभिरस्य चक्षुः।
अन्यत् पुनः कम्प्रमपि स्फुरत्वात् तस्याः पुरः प्राप नवोपभोगम् ॥६॥

[स्विद्यत्प्रमोदेति[1]। अस्य वामं चक्षुः तस्याः पुरः नवम्[2] उपभोगं प्राप ददर्श। किंभूतम्? प्रमोदेन अश्रुणो[3] ~~लवेन~~ बाष्पस्य लवेन स्विद्यत्। तथा पक्ष्मभिः रोमाञ्चभृत्। पक्ष्मरोमाण्येव रोमाञ्चः। यः स्त्रिया नवम् उपभोगं[4] लभेत स सात्त्विकस्वेदरोमाञ्चाभ्यां[5] व्याप्यते। अन्यत् दक्षिणं चक्षुः पुनः स्वेदरोमाञ्चसहितं तथा स्फुरतो भावः स्फुरत्वम्। तस्मात् कम्प्रमपि कम्पयुक्तं[6] च[7] सत् तस्याः नवो[8]पभोगं प्राप। दक्षिणास्फुरणेन प्रियाप्तेः सूचनम्[9] ॥६॥]

रथादसौ सारथिना सनाथाद्राजाऽवतीर्याऽऽशु पुरं विवेश।
निर्गत्य बिम्बादिव भानवीयात्सौधाकरं मण्डलमंशुसङ्घः ॥७॥

1 P1 भैमी। 2 P2 निस्श्वास 3 P1 इति किम्? 4 P1 add. पीड़ (॥५॥) पाने। भावशबलता। अनुप्रासः काव्यलिङ्गं च ॥५॥

1 P1 स्विद्या। 2 P2 om. नवम् 3 P2 अश्रुलवेन स्विद्यत् 4 P1 भोगं 5 P1 रोमाञ्चसूचाभ्यां 6 P2 ०युक्तं 7 P2 वसन् 8 P2 नवो० 9 P1 add. स्फुरत्वादिति शतृप्रत्ययात् त्वप्रत्ययः। इगुपधे (पा० III.i.135) त्यादिना कप्रत्यये स्फुरत्वादिति ध्याभावा: (?) । समासोक्तिः ॥६॥

सर्ग ६ 5

[रथादसावितिः। असौ[1] राजा[2] नलः सारथिना समं रथात् अवतीर्य आशु पुरं विवेश। यथा भानोः श्रीसूर्यस्य सम्बन्धिनो बिम्बात् निर्गत्य अंशूनां किरणानां सङ्घः सौधाकरं चन्द्र[3]मण्डलं विशति। देवैः पीतं चन्द्रं सुषुम्नाख्यो रविरश्मिराप्याययति[4]॥७॥]

चित्रं तदा कुण्डिनवेशिनः सा नलस्य मूर्तिर्वपुते न दृश्या।
बभूव तच्चित्रतरं तथापि विश्वैकदृश्यैव यदस्य मूर्तिः॥८॥

[चित्रं[1] तदेति। (उपजाति)। चित्रम् आश्चर्यम्। यत्तदा कुण्डि[2]नवेशिनः[3] कुण्डिनप्रवेशशीलस्य नलस्य मूर्तिर्न[4] दृश्या वपुते दृश्या जाता। तच्चित्रतरम्[5] अति आश्चर्यतरं बभूव[6]। तथापि यत् अस्य मूर्तिः[7] शरीराकृतिः विश्वमध्ये एका दृश्यैव बभूव। यद्दृश्यं तत्कथं सर्वदृश्यम्? अपि च रमणीया एकैव?[8]॥८॥]

जनैर्विदग्धैर्भवनैश्च मुग्धैः पदे पदे विस्मयकल्पवल्लीम्।
तां गाहमानोऽस्य पुरं नलस्य दृष्टिर्ययौ राजकुलातिथित्वम्॥९॥

[जनैर्विदग्धैरिति[1]। अस्य दृष्टिः तां पुरं गाहमाना अथ राजकुलातिथित्वम्[2] आदेशे राजमन्दिरं गता[3]। किं कुर्वाणा? विदग्धै-

1 P. रथा। 2 P2 राजा add. आशु 3 P. चन्द्रसम्बन्धि॰ 4 P. add. अनुप्रास उपमा च पर्यायश्च॥७॥

1 P. चित्रां 2 P2 कुण्डिन 3 P2 om. कुण्डिन॰ 4 P2 om. नलस्य 5 P1P2 om. चित्रतरम्; edn. add. चित्रतरम् 6 P2 om. बभूव 7 P1P2 om. मूर्तिः; edn. add. चित्रमूर्तिः 8 P. add. विरोधः॥८॥

1 P. जनैरित्यादि। 2 P2 om. राज॰ गता। 3 P. add. तद्दर्श। अहो (आडो) दोऽनास्य विहरणे (पा I iii.20) इत्यात्मनेपदम्। विगाहमानस्य पुरं नलस्य दृष्टिर्ययौ। पाठान्तरम्।

सर्ग ६

दृष्टैर्जनैस्त्वरया मुग्धैरन्यैर्भवनैर्गृहैः पदे पदे स्थाने स्थाने विस्मयस्य कल्पवल्लीम् अतिशयेन दात्रीम् ॥९॥

हेलां दधौ रक्षिजने ससज्जे लीनस्त्वरामीति हृदा ललज्जे।
द्रक्ष्यामि भैमीमिति सन्तुतोष दूतं विचिन्त्य स्वमसौ शुशोच ॥१०॥

[हेलां दधाविति । स नलः असौ सज्जे रक्षिणां जने जनविषये हेलाम् अवज्ञां दधौ तथा लीनो गुप्तः सन् त्वरामि इति कृत्वा हृदा हृदयेन ललज्जे । अहमद्य भैमीं द्रक्ष्यामीति कृत्वा सन्तुतोष । किं च स्वम् आत्मानं दूतं विचिन्त्य शुशोच । दूतो निकृष्टः । तथा दूत्ये सति मनोविकारो धर्मो न भवति । अतः शोकः ॥१०॥]

अथोपकार्याममरेन्द्रकार्यात् कक्षासु रक्षाधिकृतैरदृष्टः ।
भैमीं दिदृक्षुर्बहु दिक्षु चक्षुर्दिशन्नसौ नामविशद्विशङ्कः ॥११॥

[अथोपकार्यामिति । असौ ताम् उपकार्यां राजभवनम् अमरेन्द्रकार्यात् विशङ्कः सन् अविशत् । किंभूतः ? भैमीं दिदृक्षुः सन् बहु दिक्षु सर्वत्र चक्षुर्दिशन् । किंभूतः ? कक्षासु द्वारान्तरेषु रक्षाधिकृतैः अदृष्टः ॥११॥]

4 P2 रम्यैः॰ 5 P1 om. पदे स्थाने स्थाने 6 P1 add. आश्चर्यस्य 7 P1 add. अनुप्रासो रूपकं पर्यायश्च ॥९॥ 1 P1 हेलां । 2 P1 सज्ज 3 P2 om. जने जन॰ 4 P1 दधे 5 P2 त्वरामि 6 P1P2 om. हृदा ; edi. add. हृदा 7 P2 मनोवि॰ 8 P1 add. भावशबलता ॥१०॥ 1 P2 text विशन् 2 P1 अथो । 3 P1 भुवनम् 4 P2 om. अविशत् 5 P1 दिक्षु॰ 6 P1 add. बहुरिति क्रियाविशेषणम् । मुहुर्मुहुरित्यर्थः । क्रियाविशेषणं वा । 7 P1 add. अनुप्रासो हेतुश्च ॥११॥

सर्ग ६ 7

अयं क इत्यन्यनिवारकाणां गिरा विभुर्द्वारि विभुज्य कण्ठम् ।
दृशौ[1] दधे विस्मयनिस्तरङ्गौ स लङ्घितायामपि राजसिंहः ॥१२॥

[अयं[2] क इति । स विभुः राजा सिंह इव । उपमितं व्याघ्रादिभिः सामान्याप्रयोगे (पा० २।१।५६) इति समासः । अथ[3] वा राजैव सिंह इति रूपकम् । अथ वा[4] राज्ञां सिंहः लङ्घितायामपि[5] अतिक्रान्तायामपि द्वारि विस्मयेन निस्तरङ्गौ निश्चलौ दृशौ दधे । किं कृत्वा ? कण्ठं विभुज्य वक्रीकृत्य पश्चाद् व्याघुटिकया । अयं कः प्रविशति इत्यन्यस्य[6] प्रवेष्टुर्निवारकाणां रक्षकाणां द्वाःस्थानां गिरा पश्चात् व्यावृत्य दृष्टवान् । नलो न जानाति । तैभी रक्षकैरहं दृष्टो निवारितश्च परं तैरन्यः कोऽपि प्रवेष्टा[7] आक्षिप्तः । सिंहोऽपि पश्चादवलोकनशीलो भवति । अत्र कण्ठं विभुज्य दृशौ दधे इति रूपकपरिग्रहे[8] साधकं न तूपमाया[9] बाधकम् इति रूपकमेव प्रायो[10] व्याख्येयम् ॥१२॥]

अन्तःपुरान्तः स निरीक्ष्य[1] बालां काञ्चित्समालब्धुमसंवृतोरुम् ।
निमीलिताक्षः परया भ्रमन्त्या सङ्घट्टमासाद्य चमच्चकार ॥१३॥

[अन्तःपुरान्तरिति[2] । स[3] नलः परयाऽन्यया बालया कार्यवशाद् भ्रमन्त्या सत्या[4] सङ्घट्टं तस्याः स्पर्शमासाद्य चमच्चकार चमत्कृतवान् । किंभूतः ? काञ्चिद् बालाम् अन्तःपुरान्तः समालब्धुम् उद्वर्तयितुम् असंवृतोरुम् असंवृतौ[5] अनाच्छादितौ ऊरू यया

1 P2 text पदे 2 P1 अयं क । 3 P1 अथ वा 4 P1 om. अथ वा 5 P2 लङ्घितापि 6 P2 om. इति 7 P2 प्रविष्टो 8 P2 परिग्रहे न तूपमाया 9 P1 om. प्रायो 10 P1 add. रूपकं जानीध्वं ॥१२॥ 1 P2 text विलोक्य 2 P1 अन्तः । 3 P1 स नलः ; add बालया 4 P1 om. सत्या 5 P2 om. असंवृतौ

सर्ग ६ 8

ता तथाविधा निरीक्ष्य[6] निमीलिताक्षः परस्त्रिया गुह्ये स्थाने न क्षेप्यमिति बुद्ध्या चक्षुषी निमीलितवान् । ततश्च अन्यया स्त्रिया अभ्यर्थितस्ततः परस्त्रीस्पर्शभयेन चमत्कृतः[7] ॥१३॥

अनादिसर्गस्रजि वाऽनुभूता चित्रेषु वा भीमसुता नलेन ।
जातेव यद्वा जितशम्बरस्य सा शाम्बरीशिल्पमलक्षि दिक्षु ॥१४॥

[1] अनादिसर्गेति । सा दमयन्ती तेन नलेन सर्वासु दिक्षु अलक्षि । वा[3] अथवा अनादिर्या सर्गस्रक् सृष्टिपरम्परा तस्याम् अनुभूता सती सर्वत्र दृष्टा । नलो दमयन्ती च सर्गे सर्गे उत्पन्नौ[6] तस्मादनुभूतैव[7] अथवा चित्रेषु अनुभूता[8] भीमसुता । यद्वा जितः शम्बरो येन तस्य कामस्य शाम्बर्या[9] मायया शिल्पं[10] जातेव[11] । कन्दर्पेण शाम्बरी मायां जानता दिशि दिशि दमयन्ती[12] सृष्टा[13] ॥१४॥

अलीकभैमीसहदर्शनाच्च तस्याऽन्यकन्याप्सरसो रसाय ।
भैमीभ्रमस्यैव ततः प्रसादैर्भैमीभ्रमस्तेन न ताश्चकाशिरे ॥१५॥

[1] अलीकभैमीति । तस्याऽन्याः कन्या अप्सरसः न रसाय बभूवुः । कस्मात्? । अलीका भ्रान्त्या दृष्टा या भैमी तस्याः सहदर्शनात् । कन्या अपि पश्यति । भ्रान्तिभैमीमपि सहैव पश्यति । ततश्च

6 P. वीक्ष्य 7 P. add. सक्थि क्लीबे पुमानूरु (अमर० II. vi. 73) । जानुः ॥१३॥
1 P. tear व्सम्बर० 2 P. अनादि । 3 P. देवा 4 P. add. किम्? । 5 P. दृष्टि० 6 P. उत्पन्नौ 7 P. add. वा 8 P. भुवा 9 P. मायया 10 P. शल्पं 11 P. जानेव
12 P. दमयन्ती 13 P. add. अनुप्रासो विशेषः हेतुश्च ॥१४॥
1 P. अलीक ।

सर्ग ६

तस्याः समीपे ताः विरूपत्वात् नाऽनुरागाय। तत्सर्वं भैम्याः भ्रमस्य भ्रान्तेः प्रसादैरेव तेन नलेन तासु कन्यासु भैम्याः भ्रमो विलासः न अलम्भि ॥१५॥

भैमीनिराशे हृदि मन्मथेन दत्तः स्वहस्ताद्विरहाद्विहस्तः।
स तामलीकामवलोक्य तत्र क्षणादपश्यन् व्यषदद्विबुद्धः ॥१६॥

[भैमीनिराशे इति। स नलः स्वाम् अलीकां दमयन्तीम् स्वां अवलोक्य तत्र पश्चात् क्षणात् विबुद्धः बोधितभ्रान्तिः सन् अपश्यन् व्यषदत् विषादं प्राप। किंभूतः? हृदि विरहात् विहस्तो व्याकुलः। किंभूते? भैम्यां विषये निराशे आशारहिते। किंभूतात्? मन्मथेन दत्तः स्वहस्तो हस्तावलम्बो यस्य तस्मात्तया उद्दीपितात्। यस्य हस्तो दीयते तस्माद्विगतहस्तो भवति इति विरोधः ॥१६॥]

प्रियां विकल्पोपहृतां स यावद्गीशसन्देशमजल्पदल्पम्।
अदृश्यवाग्भीषितभूरिभीरुभणो स्वस्तावदचेतयत्तम् ॥१७॥

[प्रियो विकल्पेति। स नलः यावत् विकल्पेन भ्रान्तिमात्रेण उपहृतां दर्शितां प्रियां दमयन्तीम् अल्पं दिगीशानामिन्द्रादीनां सन्देशम् अजल्पत् तावत् रवः कोलाहलः तम् अचेतयत् चेतनावन्तं मोहरहितं चकार। किंभूतः? अदृश्यस्य पुरुषस्य वाचो

---

२ P. प्रसादैरेव 3 P. add. अनुप्रासो रूपकं हेतुश्च। भ्रमस्येवेति क्वचित्पाठे उत्प्रेक्षाऽपि ॥१५॥ 1 P. भैमी। 2 भैमीनिराशेति। 2 P. विलोक्य 3 B. बोधितः 4 P. add. हृदि मनसि 5 P. add. अनुप्रासो भावोदयः ॥१६॥
1 P. प्रिया। 2 P. add. नलम्

सर्ग ६ 10

भाषित भूरयो[3] या भैरव: क्रिम: तयो भव उत्पन्न:[4] ॥१७॥]

पश्यन् स तस्मिन्मरुताऽपि तन्व्याः स्तनौ परिस्प्रष्टुमिवाऽस्तवस्त्रौ।
अश्रान्तपौर्णिमामृगाङ्कमास्यं बभार[1] निर्वलितं विलक्षः ॥१८॥

[पश्यन्[2] स तस्मिन्निति। स नलः आस्यं निर्वलितं व्यावृत्तं[3] विलक्षः सन् बभार। किंभूतम्? अश्रान्तः असोढः पक्षा-[illegible]स्तस्य पूर्णिमाया मृगाङ्को येन तत्तथा जितचन्द्रम्। किं कुर्वन्? तस्मिन् सौधे तन्व्याः स्तनौ पश्यन्। किंभूतौ?[4] मरुताऽपि[5] वायुनाऽपि परिस्प्रष्टुमिव अस्तवस्त्रौ क्षिप्तवस्त्रौ[6] तस्याः परस्त्रीत्वात् स्तनदर्शने[7] मुखं वालितवान्[8] ॥१८॥]

अन्तःपुरे विस्तृतवागुरोऽपि बालावलीनां वलितैर्गुणौघैः।
न कालसारं हरिणं तदक्षिद्वयं प्रभुर्बद्धुमभून्मनोभूः ॥१९॥

[अन्तः[1]पुरे इति। मनोभूः तस्य नलस्य अक्षिद्वयमेव कालसारं हरिणं बद्धुं प्रभुर्नाभूत्। अक्षि कालं कृष्णवर्णं सारं प्रधानं यत्र तत्तथा। हरिणं पाण्डुरम्। किंभूतः? बालावलीनां कन्यापङ्क्तीनां वलितैर्दृढैर्गुणानां सौन्दर्यादीनाम् ओघैः अन्तःपुरे विस्तृता[2] वागुरा जालिका येन स तथा। अथ च बालावलीनां केशावलीनां[3]

3 P. भूरयो 4 P. add. भावोदयोऽनुप्रासो जातिश्च ॥१७॥ 2 P. [illegible] दधार
2 P. पश्य। 3 P. om. व्यावृत्तं 4 P. किंभूतः? 5 P. मरुतो 6 P. add. अस्तवस्त्रत्वं देशस्वभावात् [illegible] 7 P. स्तनदर्शने परस्त्रीत्वम् 8 P.
तौ/ add. भावोदयोऽनुप्रासो औपम्यं च ॥१८॥

1 P. अन्तः। 2 P. विस्मृता 3 P. केशानां

सर्ग ६ 11

वालितैर्गुणितैर्गुणौघैर्दोरक्षैर्विस्तृतवागुरोऽपि कालसारं न बध्नाति॥ ॥१९॥

दोर्मूलमालोक्य कचं रुरुत्सोस्तत: कुचौ तावनुलेपयन्त्या:।
नाभिमध्येव स्कन्धवाससोऽनु निमील दिक्षु क्रमकृष्टचक्षु:॥२०॥

[दोर्मूल[1]मिति। स नलोऽनु पश्चात् निमील। किंभूत:?
[2] सर्वासु दिक्षु क्रमेण कृष्टचक्षुर्येन स तथा। तथा हि कस्याश्चित्
स्त्रिया कचं केशपाशं रुरुत्सोर्बद्धुमिच्छोर्नायिकाया दोर्मूलं बाहु-
मूलं आलोक्याऽपरस्या दत्तचक्षु:। तदनु तौ स्तनौ अनुलेपयन्त्या:
कस्याश्चित् कुचौ आलोक्याऽन्यत्र दत्ताक्षि:।[3] अथ पश्चात् कस्या-
श्चित् स्कन्धवासस: नायिकाया: नाभिं[4] वीक्ष्याऽनु निमीलितवान्॥२०॥]

मीलन्नथोकेऽभिमुखागताभ्यां धर्तुं निपीड्य स्तनसान्तराभ्याम्।
स्वाङ्गान्यपेतो विजगौ स पश्चात् पुमङ्गसङ्गोत्पुलके पुनस्ते॥२१॥

[मीलन्नि[1]ति। अयं नल: मीलन् निमीलितचक्षुर्भ्रमन्[2]
अभिमुखं परस्परम् आगताभ्यां द्वाभ्याम् अन्त:पुरकन्याभ्यां
निपीड्य धर्तुं न शेके। किंभूताभ्याम्? [3]सान्तराभ्यां स्तनाभ्यां मध्ये
पतितत्वान्न धर्तुं न शक्ति:। परं स पश्चात् अपेत: स्तनान्तरान्निर्गत:
~~स्वांगं~~ सन् स्वाङ्गानि विजगौ परस्त्रीसङ्गान्निनिन्द[4]। ते द्वे स्त्रियौ पुन:

M1 add. बलं सञ्जातं येषां ते बलिन:। अनुप्रासो रूपकं च विशेषोक्ति:
स्त्रेषश्चा॥१९॥ 1 P. दोर्मूले। 2 P. add. उदीची प्राच्यवाचीषु 3 P. add.
किं कुर्वन्त्या:?। प्रकान्तविषयस्वच्छन्द: ~~4 P. add~~। 2 नाभिं; edn.
नाभिं 3 P. add. भावोदयोऽनुप्रासस्तुल्ययोगिता पर्यायो हेतुश्च॥२०॥
1 P. मीलन्। 2 P. om. भ्रमन् 3 P. add. स्तनाभ्यां 4 P. निनिन्दे —

सर्ग ६ 12

पुंसो अङ्गं पुमङ्गं तत्सङ्गेन तल्लोङ्गस्पर्शेन उत्पुलके जाते ॥२१॥]

निमीलनस्पष्टविलोकनाभ्यां कदर्थितस्ताः कलयन्कटाक्षैः।
स रागदर्शीव भृशं ललज्जे स्वतः सतां ह्रीः परतोऽतिगुर्वी ॥२२॥

[1] [निमीलनेति। स नलः भृशं ललज्जे। किं कुर्वन्? ताः अन्तःपुरपुरन्ध्रीः कटाक्षैरर्धनिमीलितैः कलयन्। किंभूतः? निमीलितेन स्पष्टविलोकनेन च [3] कदर्थितः। चक्षुर्निमीलनात् स्त्रीस्पर्शः विलोकनात् परस्त्रीणामवयवदर्शनम् उभयमपि शास्त्रविरुद्धम्। क इव? यथा रागदर्शी कटाक्षैः पश्यति तथा पश्यन् लज्जितः। यतः सतां महात्मनां परतः सकाशात् लोकेभ्यः सकाशात् स्वतः स्वस्यैवाऽपि ह्रीर्लज्जा। [ग्रे] अतिगुर्वी [4] ॥२२॥]

रोमाञ्चिताङ्गीमनु तत्कटाक्षैर्म्लानेन कामेन रतेर्निदिष्टः।
मोघः शरौघः कुसुमानि नाऽभूत्तद्धैर्यपूजां प्रतिपद्य तस्य ॥२३॥

[1] [रोमाञ्चिताङ्गीमिति। कुसुमानि शरौघः मोघः निष्फलो नाऽभूत्। किंभूतः? काञ्चित् स्वभावतो रोमाञ्चिताङ्गीं बालाम् अनु लक्षीकृत्य येन तस्य नलस्य कटाक्षाः स्वभावत एव अर्द्ध-
क/ मीलितास्तोऽक्षिनाति तैः कृत्वा म्लानेन रतेः कान्तेन स्मरेण नलं प्रति निदिष्टः प्रेरितः। कामस्य मनसि इति भ्रान्तिर्जाता। यदस्य कटाक्षैः अनुरागादियं रोमाञ्चिता तलक्ष्य बाणा मुक्ताः। तर्हि कथं

5 P1 add. काव्यलिङ्गं भावोदयः ॥२१॥ 1 P2 for om. निसर्गः 2 P1 निमीलनेत्यादि। 3 P2 om. च 4 P1 add. काव्यलिङ्गम् उपमाऽर्थान्तरन्यासश्च ॥२२॥ 1 P1 रोमाञ्चितामित्यादि।

मोघो नाऽभूदित्याह – किं कुर्वन् रोघः ? । तस्य नलस्य धैर्यस्य रुजो प्रतिपर्यवस्यन् परिणमन् । पश्चात् कालेन तस्य निर्विकारत्वे जाते तान्येव कुसुम पुष्पाणि धैर्यपूजायां कृतानि । अतिमहतामायं यत्न विक्रियते ॥२३॥

हित्वैव वर्त्मैकमिह भ्रमन्त्याः स्पर्शः स्त्रियाः सुत्यज इत्यवेत्य ।
चतुष्पथस्याऽऽभरणं बभूव लोकावलोकाय सतां स दीपः ॥२४॥

[हित्वैव वर्त्मैकमिति । स नलः चतुर्णां पथां समाहारः चतुष्पथं तस्य आभरणं बभूव । किं कृत्वा ? इति अवेत्य विचार्य । यत् इह चतुष्पथे पृथुलमार्गे भ्रमन्त्याः स्त्रियाः स्पर्शः सुत्यजः सुखेन परिह्रियते । अत एव सङ्कीर्णं वर्त्म मार्गं हित्वैव तत्र स्थितः यत्र सर्वे मार्गा मिलन्ति । तं विशिनष्टि । कीदृशमित्याह – यतः सतां लोकावलोकाय दीपो लोकव्यवहारदर्शनाय दीपः । चतुष्पथे किल दीपेन स्थाव्यम् ॥२४॥]

उद्वर्तयन्त्या हृदये निपत्य नृपस्य दृष्टिर्न्यपतद् द्रुतैव ।
वियोगिवैरात्कुचयोर्नखाङ्कैरर्धेन्दुलीलैर्गलहस्तितेव ॥२५॥

2. तस्या विकारित्वे 3. 2nd पूजायां 4. add. अनुप्रासः काव्यलिङ्गम् ॥२३॥

1. हित्वै । 2. भ्रमन्त्याः स्त्रियाः स्पर्श एव सङ्कीर्ण वर्त्म मार्गं हित्वैव इह चतुष्पथे पृथुलमार्गे सुत्यजः सुखेन परिह्रियते । अतस्तत्र स्थितं सर्वे मार्गा मिलन्ति । 3. om. तं.....भाव्यम् ॥ 4. add. ऊर्ध्वं रुद्धः पथामानके (पा० V. iv. 74) इति उत्त । काव्यलिङ्गं रूपकं च ॥२४॥

सर्ग ६ 14

[उद्वर्तयन्त्या इति। नृपस्य दृष्टिः कृता एव केनैव न्यपतत् निवृत्ता।[2] अनुदात्तत्वान्नित्यमात्मनेपदे प्राप्ते द्युद्भ्यो लुङि (पा० I.iii.91) इति वा परस्मैपदम्। कातन्त्रके पुनर्द्युतेर्ज्ञीतोरात्मनेपदिनोऽपि ( १ ) द्युतादित्वात्परस्मैपदेऽण् विधानसामर्थ्यात् अद्यतन्यां कर्तरि परस्मैपदम्। किं कृत्वा? कस्याश्चित् उद्वर्तयन्त्या अङ्गरागं कुर्वन्त्याः कामिन्या हृदये निपत्य। उत्प्रेक्षते – तस्याः कुचयोर्नखाङ्कैः गलहस्तिता इव[3]। किंभूतैः? [4]अर्धेन्दुलीलैः। नख-क्षतानि अर्द्धचन्द्राकाराणि भवन्ति। यो गले ध्रियते सोऽपि अर्द्ध-

र्ये/ चन्द्राकारं हस्तं कृत्वा प्रेर्यते। कस्मात्? वियोगिभिः सह वैरात्। यः किल विरही तस्यार्द्धेन्दुना वैरम्। कुचयोर्नखाङ्कैरपि सह

श्च/ वैरम्। स्त्रिया प्राप्त्यभावात्[5]। नलस्य दमयन्त्या सह वियोगी[6]॥२५॥]

तन्वीमुखं द्रागधिगत्य[1] चन्द्रं वियोगिनस्तस्य निमीलिताभ्याम्।
द्वयं द्रढीयः कृतमीक्षणाभ्यां तदिन्दुता च स्वसरोजता च ॥२६॥

[[2]तन्वीमुखमिति। तस्य वियोगिनो नलस्य [3]

ईक्षणाभ्यां द्वयं द्रढीयः निश्चितं कृतम्। एका तस्य तन्वीमुखस्य इन्दुता चन्द्रता[4] च निश्चिता कृता। अपरा स्वस्याऽऽत्मनः लोच-

ता/ नयोरेवेत्यर्थः स्वरोजता पद्मता वा निश्चिता[6] ईक्षणाभ्याम्[7]। किंभूता-भ्याम्? द्राक् झटिति तन्व्याः कस्या अपि मुखं चन्द्रम् अधिगत्य

1 P. उद्वर्त। 2 P2 om. अनुदात्तः... पुन० 3 P. add. गले धृता इव 4 P2 om. अर्द्धे-न्दु०... विरही तस्य 5 P. add. इति नखाङ्कैः सह साम्यादेव विरोधः। अर्द्धे-न्दुसादृश्येन अर्द्धेन्दुद्वारेण च विरोधः। अतः सादृश्यार्द्धेन्दुसम्बन्धेन

यो/ वा वैरिभिर्नखाङ्कैर्विश्वासेन धीरे नलमाश्रिताया दृष्टेस्तिरस्करणम्। 6 P. add. उत्प्रेक्षा प्रत्यनीकं च ॥२५॥ 1 P2 for अपत्य 2 P. तन्वी। 3 P2 मुखतां 4 P2 om. च 5 P. om. वा निश्चिता। 6 P. दृष्ट्या 7 P. कृत्य

सर्ग ६ 15

निमीलिताभ्याम् परस्त्रीशङ्कया। किम्भूतस्य[9]? तस्य नलस्य वियोगिनः। कमलं हि[10] चन्द्रदर्शने सङ्कुचति[11]॥२६॥

अं/ चतुष्पथे तं विनिमीलिताक्षौ चतुर्दिगेताः सुखमग्रहीष्यन्।
सङ्घट्य तस्मिन् भृशभीनिवृत्तास्ता एव तद्वर्त्म न चेददास्यन्॥२७॥

[1]चतुष्पथे इति। तं नलं चतुष्पथे स्थितं परस्त्रीदर्शनभयात् विनिमीलिताक्षिं चतसृभ्यो दिग्भ्यः एता आगताश्चतस्रः स्त्रियः सुखं यथा भवति एवं अग्रहीष्यन् अधरिष्यन्। चेत् यदि ता एव[2] चतस्रः स्त्रियः तस्मिन्नले अदृश्ये सङ्घट्य सङ्घट्टं प्राप्य को नामाऽदृश्योऽयं कश्चिदिति मत्वा[3] भृशं भिया निवृत्ताः दूरे स्थिताः तस्य नलस्य वर्त्म मार्गं न अदास्यन्[4]। परं तासु निःसृतासु निःसृत्य गच्छति[6]॥२७॥

सङ्घट्टयन्त्यास्तरसाऽऽत्मभूषाहीराङ्कुरप्रोतदुकूलहारी।
स्त/ दिशा नितम्बं परिधाप्य तन्व्याः स्त्पापसन्तापमवाप भूप॥२८॥

[1]सङ्घट्टयन्त्या इति। स भूपः कस्याश्चित् तन्व्याः नितम्बं दिशा[2] परिधाप्य दिग्वासं कृत्वा तस्य परस्त्रीवस्त्राकर्षणस्य ~~सन्तापं~~ पापस्य[3] सन्तापं दुःखम् अवाप[4]। मया पापं कृतमिति हा कष्टम्[5]।

८ f₂ तस्य ९ f₁ f₂ om. तस्य, eds add. तस्य १० f₂ om. हि ॥ f₁ add. अनुप्रासो रूपकं हेतुः अनुमानमतिशयोक्तिश्च॥२६॥
1 f₁ चतुष्पथे। f₂ चतुष्पथेति। 2 f₁ fnt? का अयं 3 f₂ om. न 4 f₁ f₁ add.
चा/ अदास्यन् 5 f₁ नि[illegible]सृ 6 f₁ जगत; [illegible] add. भावोदयः काव्यलिङ्गं च॥२७॥
1 f₁ सङ्घट्ट। 2 f₂ दिशः 3 f₂ om. पापस्य 4 f₁ f₂ आप; eds. अवाप 5 f₂ चापं

सर्ग ६ 16

कि [6] कुचलया: [7] तत्क्षण बलादागत्य सञ्घट्टयन्त्या नलं धर्षयन्त्या: ।

स/ किंभूते: नि: ? । आत्मनो भूषार्थं ये हीरा माणिक्यानि तेषाम् अङ्कुरेषु प्रोतं विलग्नं दुकूलं हरतीत्येवंशीलः । अभीक्ष्णं हरतीति वा । दुकूलस्याञ्चल-

रा/ दशा । नलभूषाहीराङ्कुरे विलग्ना तेन वस्त्राकर्षणं जातमित्यर्थः [8] ॥२८॥

हत: कयाचित् पथि कन्दुकेन सङ्घट्ट्य भिन्न: करजै: कयाऽपि ।
कयाचनाक्त: कुचकुङ्कुमेन संमुक्तकल्प: स बभूव ताभि: ॥२९॥

[हत: [1] कयाचिदिति । स नल: पथि कयाचित् अदृश्य-मान इव कन्दुकेन [2] क्रीडन्त्या दण्डकेन हत: । कयाऽपि सङ्घट्ट्य करजै- [3] र्नखैर्भिन्न: । कयाचन अदृश्य इव कुचकुङ्कुमेन [4] अक्त: [5] अभ्यक्त: अनु-लिप्त: । अनन्तरं स [6] ताभि: स्त्रीभि: ईषदपरिसमाप्त: [7] संयुक्तकल्पो बभूव । किञ्चिच्च न संयुक्त: । धर्मलोपे तद्धिते [8] आर्थी उपमा [9] ॥२९॥]

छायामय: प्रैक्षि कयाऽपि हारे निजे स गच्छन्नथ नेक्ष्यमाण: ।
त/ तच्छ्राययाऽन्तर्निरधायि चारु स्वस्यैव तन्व्या हृदये प्रविष्ट: ॥३०॥

[छायामय [1] इति । कयाऽपि स नल: गच्छन् सन् निजे हारे छायामय: प्रतिबिम्बित: प्रैक्षि दृष्ट: । अथ पश्चात् न ईक्ष्यमाण:

6 I2 किं भूतायाः (कुचलया:) ! 7 I1 add. स्पर्शसुखलोभात् 8 I1 add. अनुप्रास: काव्य-लिङ्गं समासोक्ति: भावोदयश्च ॥२८॥

1 I1 हत । 2 I1 om. कन्दुकेन...कयाऽपि 3 I1 om. करजै:...अदृश्य इव
अ/ 4 I1 om. अक्त: अभ्यक्त: 5 I1 add. कयाचिदित्यादि नवीकृतम् 6 I2 om. स 7 I1 add. संयुक्त: 8 I2 om. तद्धिते आर्थी 9 I1 add. संयुक्त उपमानम् ॥२९॥ 1 I1 छाया ।

अदृश्यमानः सन् तया तन्व्या[2] तच्चिन्तया सत्या तस्मिन्नेव नले चित्तं यस्याः तया तथाविधया स्वस्यैव[4] हृदये प्रविष्टोऽन्तश्चारु[3] निरचायि। अयमर्थः - यत्[5] स्वस्यैव हृदये प्रविष्टः। ममैव[6] हृदि अयं प्रविष्टः इति निरचायि। अन्तर्निश्चितं तत् चारु सम्यक् निश्चितम्।[7] तया एकचित्तया[8]॥ ॥३०॥

तच्छायसौन्दर्यनिपीतधैर्याः प्रत्येकमालिङ्गदमू रतीशः।
रतिप्रतिद्वन्द्वितमासु नूनं नामूषु निर्णीतरतिः कथञ्चित्॥३१॥

[तच्छायसौन्दर्येति[1]। रतीशः अमूः ताः पुरकन्याः प्रत्येकम् आलिङ्गत्। किंभूताः? तस्य छाया प्रतिबिम्बस्तच्छायं तस्य सौन्दर्येण निपीतं[2] धैर्यं यासां तास्तथा। नूनं शङ्के। अमूषु स्त्रीषु कथञ्चिदपि न निर्णीता निश्चिता रतिः रमणी येन स तथा। [3]अथ च न निर्णीता रतिर्भार्या येन, अत एव बह्वीनामालिङ्गनम्। किंभूतासु? रतेः प्रतिद्वन्द्वितमासु स्पर्धिनीषु सदृशीषु। रतिभ्रान्त्या आलिङ्गत्। विभाषा सेनासुराच्छायाशालानिशानाम् (पा० II.iv.25) इत्येतदादिश्लोकचतुष्टये छायान्तस्य तत्पुरुषस्य नपुंसकत्वम्[4]॥ ॥३१॥

६। तस्माद्दृश्यादपि नाऽतिबिभ्युस्तच्छायरूपाहितमोहल्लोलाः।
मन्यन्त एवाहतमन्मथास्ताः प्राणा अपि प्रांशुदृशोस्तृणाय[1] ॥३२॥ /श

2 l2 ०चित्ततया 3 l. अधि 4 l2 om. स्वस्यैव... अयमर्थः 5 l. यत्तस्यैव
6 l. om. ममैव... प्रविष्टः 7 l. om. निश्चितम् 8 l. add. तच्चिन्तया
9 l. add. चिन्तया चारुरिति पाठान्तरम्। भावोदयः॥३०॥

1 l. तच्छाय। 2 l2 पीतं 3 l2 अत एव बह्वीनामालिङ्गनम् here
4 l. add. भावशान्तिरनुप्रासो हेतूत्प्रेक्षा श्लेषश्च ॥३१॥
1 l2 text प्राणानपि स्वान् सुदृशस्तृणानि॥

सर्ग ६ 18

[तस्मादहृश्यादिति। ता: स्त्रिय: तस्मात् अदृश्यादपि जना: अतिशयेन बिभ्यु:। किंभूता:? तस्य छायारूपेण आहितो यो मोहस्तेन लोला:। किंतु प्रांशुदृशो नायिकाया आहता मन्मथस्य आज्ञा याभि: एवंविधा: सत्य: प्राणा अपि तृणाय मन्यन्ते स्म। एवं स्वान् सुदृश इति पाठे स्वान् प्राणानिति सम्बन्ध:॥३२॥]

जागर्ति तच्छायदृशां पुरा य: स्पृष्टे च तस्मिन् विससर्प कम्प:।
द्रुतं द्रुते तत्पदशब्दभीत्या स्वहस्तितस्त्वायुदृशां परं स:॥३३॥

[जागर्ति तच्छाय इति। य: कम्प: पुरा तस्य छायदृशां स्त्रीणां जागर्ति उल्ललास। यावत्पुरानिपातयोर्लट् (पा० III.iii.4)। सात्त्विकभावादुत्पन्न: पश्चात् तस्मिन्नले स्पृष्टे च स एव कम्प: विससर्प। सात्त्विक एव प्रसरं भेजे। तासां चारुदृशां तस्मिन्नले द्रुतं वेगेन द्रुते गते सति तस्य पदानां शब्दात् भीत्या परं केवलं स्वहस्तित: आत्महस्तगत: कृत:। यदा अदृश्यस्य भूतादे: पादानां शब्द: श्रूयते तदा महान् कम्पो भवति। ततश्च दिह्यमान एव कम्प: भयादधिको बभूव॥३३॥]

2 P. तस्मा।; P2 तस्मादहृश्यामिति। 3 P. ता:: बिभ्यु: om. लोला: 4 P. om. किंभूता:? 5 P. छायाया 6 P. add. अत्र सामान्येन समर्थनमाह; and om. किंतु 7 P. प्राणान् 8 P. add. तृणानि 9 P2 add. स्म 10 P. add. शब्दो यस्मात् अर्थे 11 P. add. विरोधो भावोदयोऽर्थान्तरन्यासस्त्वछाये-त्यादि हेतुगर्भ पदम्॥३२॥ 1 P. जागर्ति 2 P2 तनस्य 3 P. छाया; P2 दृश्यां 4 P. लट् 5 P2 हस्तिभि: 6 P. दृश्यभूतादे: 7 P. add. छायादर्शनजनित: स्पर्शादिप्रस्तुत: कम्प: शङ्कारस्याङ्गिनोऽनुभाव:। पदशब्दभीत्या स्वहस्तितोऽयं भयानकस्याऽऽस्याऽनुभाव:। अनुप्रासो भावोदय:॥३३॥

उल्लास्यतां स्पृष्टनलाङ्गमङ्गं तासां नलच्छाययपि द्रागपि दृष्टिः।
अश्मैव रत्यास्तदनर्ति पत्या छेदेऽप्यबोधं यदहर्षि लोम ॥३४॥

[उल्लास्यतामिति[1]। तासां स्त्रीणाम् अङ्गं स्पृष्टं[2] नलाङ्गं येन तत्तथापि धं भणित्वा उल्लास्यताम् उल्लासं प्रमदं प्राप्नोतु। तथा[3] नलच्छायस्य पिबा दृष्टिरपि उल्लास्यताम्। कर्मकर्तरि आत्मनेपदम्। तत्[4] रत्याः पत्या कामेन अश्मा पाषाण एवाऽनर्ति नर्तितः[5] यल्लोमाऽहर्षि[6][7]। किम्भूतम्? छेदेऽपि सति अबोधं[8] जडम् अचेतनस्यापि लोम्नो हर्षः[9] ॥३४॥]

यस्मिन्नलस्पृष्टकमेत्य दृष्ट्वा भूयोऽपि तं देशमगान्मृगाक्षी।
निपत्य तत्राऽस्य धरारजःस्थे पदे प्रसीदेति शनैरवादीत् ॥३५॥

[यस्मिन्नलेति[1]। काचिन्मृगाक्षी[2] यस्मिन् प्रदेशे नल[3]स्पृष्टकं नाम आलिङ्गनविशेषम् एत्य दृष्ट्वा भूयोऽपि तं देशम् अगात् तत्र प्रदेशे अस्य नलस्य धरायाः[4] पृथिव्याः रजसि स्थे[5] स्थिते प्रतिबिम्बिते पदे[6] दृष्टे सति निपत्य[7] इति शनैर्मन्दम् अवादीत् यत्[8] हे
न/ कामि[9]नि! प्रसीद। तथा चोक्तम् - यद्योषितः सम्मुखमागतायाः अन्या-[10]

1 P1 उल्लास्य। 2 P2 om. स्पृष्टं नलाङ्गं 3 P1 om. तथा 4 P1 तत: 5 P1 add. अश्मैवेति पाठे रत्याः पत्या अश्मैव नलाय तदनर्ति नृत्तं प्रयत्नः कृतः। 6 P2 ०लोमहर्षि 7 P1 add. कर्मकर्तरि 8 P2 सच्चेतं 9 P1 add. भावोदयः काव्यलिङ्गं विरोधोऽनुप्रासोऽपि ॥३४॥

1 P1 यस्मिन्नि॰ 2 P2 मृगाक्षी काचित् 3 P1 नलस्य 4 P2 om. विसर्गः 5 P1 P2 om. स्थे; edn. add. स्थे 6 P2 पादे 7 P2 om. निपत्य 8 P1 om. यत् 9 P2 कामिनि! 10 P2 अन्यो॰

सर्ग ६ 20

पदेशात् व्रजतो नरस्य। गा(३४१)त्रेण गात्रं भजते स्तना आलिङ्गनं स्पृष्टकमेतदाहुः (रतिरहस्यम्-VI.i.)[1] ॥३५॥

भ्रमन्नमुष्यामुपकारिकायामाभौमस्य भैमीविरहात् कृशीयान्।
असौ मुहुः सौधपरम्पराणामधत्त विश्रान्तिमुपत्यकासु ॥३६॥

[भ्रमन्नमुष्यामिति[1]। असौ मुहुः[2] सौधपरम्पराणाम् उपत्यकासु अधोभूमिषु विश्रान्तिम् अधत्त। उपाधिभ्यां त्यकन्नासन्नारूढयोः[3] (पा० V.ii.३४)। किं कृत्वा? आयस्य आयासं प्राप्य। यतः[4] भैम्या विरहात् कृशीयान् कृशतरः। किं कुर्वन्? अमुष्याम् उपकारिकायां राजगृहे भ्रमन्[5] ॥३६॥]

उल्लिकस्य हंसेन दले नलिन्यास्तस्मै यथाऽदर्शि तथैव भैमी।
तेनाऽभिलिख्योपहृतस्वहारा करस्था न ह्यस्याऽजनि विस्मयाय ॥३७॥

[उल्लिकस्येत्युच्येति[1]। भैमी तस्मै नलाय हंसेन नलिन्या

1. add. स्पृष्टकसंज्ञायाः प्रवृत्तिनिमित्तं योऽर्थः स्पर्शलक्षणः तेनैव कर्मनिर्देशः। स्पृष्टकमिति नपुंसके क्तः। पश्चात् संज्ञायां कन् (पा० V.iii.८७)। अनुरागस्य स्पृष्टकं लिङ्गं तत्प्रकाशनात्। वात्स्यायनीये कामशास्त्रे साम्प्रयोगिके द्वितीयेऽधिकरणे द्वितीयाध्याये आदितः सप्तमे उपगूहनविचारे षष्ठमे प्रकरणे प्रयोज्यप्रयोक्तृभावादिरस्य प्रपञ्चो द्रष्टव्यः। तद्भावोदयोऽनुप्रासः ॥३५॥ 1. भ्रमन्नि। 2. om. मुहुः 3. add. उपत्यकाद्रेरासन्ना भूमिरि (अमर० II.iii.७) इति। यद्यपि उपत्यकाऽद्रेर्भूमिरित्येव /प तथापि सौधपरम्परासु अद्रित्वारोपादेवं प्रयोगः। न यासयोरि (पा० VII.iii. ४५) त्यत्र त्यकन्प्रसङ्ख्यानादित्याभावः। 4. om. यतः... कृशतरः 5. add. काण्डलिङ्गम् ॥३६॥ 1. उल्लिकस्य।

सर्ग ६ 21

दूते पत्रिकोपित्रे उल्लिखस्य येषां याहृशी अदर्शि पूर्वं दर्शिता अभूत् । तथैव ताहृशी एव तेन नलेनाऽपि तत्र राजगृहभूमिप्रदेशे आलि-खिस्य उपहृतः स्वकीयो हारो यस्याः तथाविधा दृष्टा सती सा दमयन्ती कस्याः अन्तःपुरस्त्रियाः विस्मयाय न अजनि अपि तु सर्वा-साम्[4] आश्चर्याय बभूव । केनेयं लिखितेति[5] ॥३७॥

---

कौमारगन्धीनि निवारयन्ती वृत्तानि रोमावलिवेत्रचिह्ना ।
साऽऽलिख्य तेनैक्ष्यत यौवनीयद्वाःस्थामवस्थां परिचेतुकामा ॥३८॥

---

[ कौमारगन्धीनीति[1] । सा दमयन्ती तेन नलेन आलिख्य ऐक्ष्यत[2] । किंभूता? यौवनीयद्वारि यौवनस्य द्वारे तिष्ठतीति द्वाःस्था ताम्[3] अवस्थां बाल्ययौवनयोः सन्धिरूपाम् अवस्थां परिचेतुकामा अभ्यसितुमिच्छुः । द्वाःस्थायाः प्रतिहार्या धर्मान् आह - किं कुर्वती ?[4] कौमारगन्धीनि वृत्तानि आचरणानि निवारयन्ती । कौमारेऽस्तनभावात् कञ्चुकादिकं न स्यात् । तत्र तु भवति । तथा किंभूता? रोमावलिरेव वेत्रो दण्डश्चिह्नं यस्याः सा तथा[5] ॥३८॥ ]

---

पश्याः पुरन्ध्रीः प्रति सान्द्रचन्द्ररजःकृतक्रीडकुमारचक्रे ।
चित्राणि चक्रे ध्वनिचक्रवर्तिचिह्नं तदङ्घ्रिप्रतिमासु चक्रम् ॥३९॥

---

~~1 P. आलिख्य~~ 2 P. यया 3 P. अत्र 4 P. add. अपि 5 P. add. भावेयः ॥३७॥

1 P. कौमार । 2 P. ऐक्ष्यत ईक्षिता 3 अवस्था 4 P. add. कौमारगन्धो ऽ-न्यो विद्यते येषामल्पाख्यायामि (पा॰ V. iv. 136), गन्धस्येत्॰ (पा॰ V. iv. 135); तानि 5 P. add. स्वरूपकम् ॥३८॥

4

[पश्या: पुरन्ध्रीरिति[1] । तस्य नलस्य अङ्घ्रिप्रतिमासु चरणप्रतिबिम्बेषु चक्रं रेखाचिह्नम् अध्वनि[2] धवलगृहे वर्तमानं पश्या: अवलोकयित्री: पुरन्ध्री: प्रति लक्षीकृत्य चित्राणि आश्चर्याणि चक्रे । किंभूतं चक्रम्? । चक्रवर्तिनश्चिह्नं लक्षणम्[3] । किंभूते ध्वनि? । सान्द्रं बहुलं यत् चन्द्रस्य कर्पूरस्य रजः तत्र कृतक्रोडं क्रीडापरं कुमारचक्रं बालवृन्दं यत्र तत्र तथा । तत्र पदं चक्रयुक्तं दृष्ट्वा स्त्रियो विस्मिताः । [4]पाघ्राध्माधेड्दृशः शः (पा० III । ० ) इति शप्रत्ययः[5] ॥३९॥]

तारुण्यपुण्यामवलोकयन्त्योरन्योन्यमेणीक्षणयोरभिख्याम् ।
मध्ये मुहूर्तं स बभूव गच्छन्नाकस्मिकाच्छादनविस्मयाय ॥४०॥

[तारुण्यपुण्यामिति[1] । स नलः कयोश्चिद्[2] द्वयोः एणीक्षणयोः स्त्रियोर्[3] मध्ये अन्तराले गच्छन् सन् आकस्मिकं यत् आच्छादनं व्यवधानं तेन कृत्वा द्वयो विस्मय आश्चर्यं तस्मै बभूव । किंभूतयोः? । अन्योन्यं तारुण्येन पुण्याम् अभिख्यां परस्परशोभां विलोकयन्त्योः । यदा स मध्येऽदृश्यः सञ्चरति, तदा एकया इतरस्याः शरीरं न दृष्टम् । इतरया च तस्या वपुर्न दृष्टम् । अतस्तयोराश्चर्यम्[4] ॥४०॥]

1 P1 पश्यातर ; P2 यस्याः पुरन्ध्रीरिति । 2 P2 om. अध्वनि .... चिह्नं
3 P1 add. नृपचक्रे राजचक्रे वर्तते स्वाम्येन, चक्रे राष्ट्रं वर्तयति वा चक्रवर्ती सार्वभौम उच्यते 4 P1 add. अन्यत्रापीति वचनात् अनुपसर्गेऽपि 5 P1 add. भावोदयोऽनुप्रासश्च ॥३९॥

1 P1 तारुण्ये ; P2 तारुण्यपुण्यामिति । 2 P1 कया 3 P1 om. स्त्रियो: 4 P1 add. भावोदयोऽनुप्रास उपमा च ॥४०॥

सर्ग ६ 23

पुरःस्थितस्य क्वचिदस्य धूपारत्नेषु नार्य्यः प्रतिबिम्बितानि।
व्योमन्यदृश्येषु निजान्यपश्यन् विस्मित्य विस्मित्य सहस्रकृत्वः॥४१॥

[1] पुरःस्थितस्येति। नार्य्यः अस्य नलस्य क्वचित्
प्रदेशे धूपारत्नेषु निजानि प्रतिबिम्बितानि व्योमनि आकाशे
विस्मित्य विस्मित्य[2] आश्चर्यं प्राप्य प्राप्य[3] सहस्रकृत्वो[4] ऽनेकवारमिदं
अपश्यन्। किंभूतेषु? अदृश्येषु। नलस्याऽदृश्यत्वाद्रत्नान्यप्यदृश्यानि।
स्त्रीणां दृश्यत्वात् प्रतिबिम्बानि दृश्यानि॥४१॥

तस्मिन् विधेयोऽर्द्धपथात्तपातं तदङ्गरागच्छुरितं निरीक्ष्य।
विस्मेरतामापुरविस्मरन्त्यः क्षिप्तं मिथः कन्दुकमिन्दुमुख्यः॥४२॥

[1] तस्मिन्निति। इन्दुमुख्यः स्त्रियः मिथः परस्परं क्रीडार्थं
क्षिप्तं कन्दुकं क्रीडनकं तस्मिन्नले अदृश्येऽपि विधेये स्खलित्वा
अर्द्धपथे आत्तपातं पतितं निरीक्ष्य विस्मेरताम्[2] आश्चर्यताम् आपुः।
किंभूतम्? तस्य[3] अङ्गरागेण कुङ्कुमादिना छुरितम् अभ्यक्तम् अनु-
लिप्तम्। किं कुर्वन्त्यः? अविस्मरन्त्यः[4]॥४२॥

पुंसि स्वभर्तृव्यतिरिक्तभूते भूत्वाऽप्यनीशा नियमप्रतीत्यः।
छायासु रूपं भुवि वीक्ष्य तस्य फलं दृशोरानशिरे महिष्यः॥४३॥

1 Pi पुरः। 2 P2 om. विस्मित्य 3 P2 om. प्राप्य 4 P2 कृत्वा 5 Pi add.
अनुप्रासोऽतिशयोक्तिश्च॥४१॥

1 Pi ~~कि~~ तस्मि। 2 P2 विस्मेरत्वम् 3 Pi add. नलस्य 4 Pi add. अनुप्रासः
काव्यलिङ्गमुपमा वा॥४२॥

[पुंसि[1] स्वभर्तुः इति। महिष्यः अन्तःपुरस्त्रियः भुवि मणिमयप्रदेशे छायासु तस्य रूपं वीक्ष्य[2] दृशोः फलम् आनशिरे कृत्वाऽपि। स्वस्मात् भर्तुः व्यतिरिक्तभूते पुंसि परपुरुषे[3] अनी-[4]
था:/ क्षायाः अनीक्षणस्य अनवलोकनस्य नियमव्रतिन्यो भूत्वाऽपि। नियमेनाऽन्यपुरुषानवलोकने[5] सत्यपि। नियमव्रतिनो हि फलप्राप्त्या भाव्यम्[6] ॥४३॥]

विलोक्य तच्छायमतर्कि ताभिः पतिं प्रति स्वं वसुधाऽपि धत्ते।
यथा वयं किं मदनं तथैनं त्रिनेत्रनेत्रानलकीलनीलम् ॥४४॥ कि

[विलोक्य[1] तच्छायमिति। ताभिः स्त्रीभिः तच्छायं[2] तस्य छायां प्रतिबिम्बं विलोक्य इति अतर्कि। विभाषा सेनेत्यो°
ला पा.iv.25 इत्यादि नपुंसकत्वम्। किम्[3] इति वसुधाऽपि तथा स्वम् आत्मीयं पतिं प्रति एनं नलच्छायालक्षणं[4] मदनं धत्ते। किंभूतम्? त्रिनेत्रस्य ईश्वरस्य नेत्रानलस्य कीलो[5] ज्वाला[6] तेन[7] नीलम्। छाया हि मेचका भवति[8]। यथा वयं स्त्रियः स्वं भर्तारं प्रति कामं बिभृमः[9] ॥४४॥]

रूपं प्रतिच्छायिकयोपनीतमालोकि ताभिर्यदि नाम कामम्।
तथाऽपि नालोकि तदस्य रूपं हारिद्रभङ्गाय विशीर्णभङ्गम् ॥४५॥

1 P1 पुंसि। 2 P2 व्यतिरिक्तं 3 P1 पुरुषे 4 P2 om. अनीक्षायाः 5 P1 °पुरुषावलोकनस्य 6 P1 add. विरोधोऽतिशयोक्तिश्च ॥४३॥

1 P1 विलोक्य। 2 P2 तच्छायां 3 P1 इति किम्?। 4 P1 छायलक्षणं 5 P2 कील° 6 P1 ज्वालास्तेन 7 P2 तया 8 P1 भवन्ति 9 P1 add. [वह्नेर्द्वयो-ज्वालकीलावर्चिः (अमर° I.i.57)] इति वचनात् कीलशब्दः पुंल्लिङ्गोऽपि। अनुप्रास उपमोत्प्रेक्षा ॥४४॥

सर्ग ६ 25

[रूपं[1] प्रतीतीति यदि नाम ताभिः स्त्रीभिः प्रतिच्छायिकया उपनीतं रूपं[2] कामं स्वेच्छया आलोकि। तथाऽपि अस्य नलस्याऽदृश्यत्वात् तत्[3] यथावस्थितं रूपं न आलोकि। किंभूतम्? आलोकि आलोकयुक्तम्। उज्ज्वलं न दृष्टम्। छायामयमेव दृष्टम्[4]। [5]किंभूतं रूपं न दृष्टम्? इत्याह – यत् रूपं हरिद्रायाः[6] अयं हारिद्रो यो भङ्गः खण्डः तस्मै वितीर्णभङ्गम्। अथवा आलोकीति पादसंनिधानात् हरिद्रशब्देन लक्षणया सुवर्णं लक्ष्यते। तदयमर्थः – आलोकयुक्तत्वात् हारिद्रस्य सुवर्णस्य भङ्गाय छेदाय वितीर्णभङ्गं दत्तपराजयं तन्न दृष्टम्[7]। आलोकीति[8] पदं पूर्ववाक्यगतं वाक्यद्वये योजनीयम्। उत्तरवाक्यगतं वा[9] आख्यातत्वेन मत्वर्थीयान्तत्वेन च योजनीयम्[10] ॥७५॥]

---

भवन्नदृश्यः प्रतिबिम्बदेहव्यूहं वितन्वन् मणिकुट्टिमेषु।
पुरं परस्य प्रविशन् वियोगी योगीव चित्रं स रराज राजा ॥७६॥

---

[भवन्नदृश्य[1] इति। चित्रम् आश्चर्यं स राजा योगी इव रराज। किं कुर्वन्? अदृश्यो भवन्। तत्र[2] मणिमयकुट्टिमेषु प्रतिबिम्बरूपदेहानां व्यूहं समूहं वितन्वन्। तथा परस्य[3] पुरम् अन्तःपुरं वा प्रविशन्। वियोगी विरही। योगी अपि अणिमदृश्यः अणौ बहूनि शरीराणि[4] तनोति[5]। परशरीरप्रवेशं[6] च[7] कुरुते ॥७६॥]

---

1 P₁ रूपं; P₂ रूपं प्रतीति। 2 P₂ तं 3 P₁ स्वरूपं; P₂ om. रूपं 4 P₂ add. श्यामम् 5 P₁ om. किं...दृष्टम्। 6 P₂ om. हरिद्रायाः... तदयमर्थः 7 P₁ add. आख्याते 8 P₂ आलोकतीति 9 P₂ om. वा 10 P₁ add. प्रतीपम् ॥७५॥

1 P₁ भवन्निति। 2 P₂ तथा 3 P₂ परपुरं [illegible] इत्यन्तःपुरं नगरम् 4 P₂ शरीराण्यस्य 5 P₂ om. तनोति 6 P₂ परशरीरे 7 P₁ कुरुते च। and add. अनुप्रासो विरोध उपमा च ॥७६॥

सर्ग ६ 26

पुमानिवाऽस्पर्शि मया प्रेमन्त्या छाया मया पुंस इव व्यलोकि।
ब्रुवन्निवाऽतर्कि मयाऽपि कश्चिदिति स्म स स्त्रैणगिरः शृणोति॥४७॥

[1पुमानिवेति। स नल इति स्त्रैणगिरः स्त्रीणां वाचः शृणोति स्म। स्त्रीपुंसाभ्यां नञ्स्नञौ भवनादि (पा० IV. i. 87) ति नञ्। इतीति किम्? मया प्रेमन्त्या पुमानिव अस्पर्शि। मया च पुंसः2 छाया इव व्यलोकि। मयाऽपि कश्चिद् ब्रुवन्निवाऽतर्कि3 4॥४७॥]

अम्बां प्रणम्योपनता नताङ्गी नलेन भैमी पथि योगमाप।
स भ्रान्तिभैमीषु न तां विवेद1 सा तं च नाऽदृश्यतया ददर्श॥४८॥

[2अम्बां प्रणम्येति। 3नताङ्गी बाला4 अम्बां मातरं प्रणम्य5 उपनता सती भैमी नलेन सह पथि योगम् आप। परं6 स तां दमयन्तीम् इ/ अन्यासु भ्रान्त्या दृश्यमानासु भैमीषु मध्ये न विवेद7 नाऽजानात्। सत्या इयमिति। सा च तम् अदृश्यतया न ददर्श8॥४८॥]

प्रसूप्रसादाधिगता प्रसूनमाला नलस्योद्भमवीक्षितस्य।
क्षिप्ताऽपि कण्ठाय तयोपकण्ठस्थितं लगाऽलम्बत सत्यमेव॥४९॥

1 P. पुमानिव। 2 P2 इति किम्? Edd. इतीति किम्? 3 P2 व्यतर्कि 4 P. add. उपमा॥४७॥

1 P2 बभव विविक्त 2 P. अम्बा। 3 P. नताङ्गी alt सती 4 P. om. बाला 5 P. add. प्रणिपत्य 6 P. om. परं 7 P2 विशेषेण वेद 8 P. add. सम्भ्रान्तिभैमीषु न तां व्यनक्ति। सा तं च नादर्शदुदृश्यमेवेति पाठान्तरम्। अनुप्रासः काव्यलिङ्गं च॥४८॥

सर्ग ६ 27

[1]प्रसूप्रसादेति। प्रसूनानां पुष्पाणां माला तया दमयन्त्या उत्क्रमेण वीक्षितस्य भ्रान्तिदृष्टस्य नलस्य कण्ठाय क्षिप्ताऽपि उपकण्ठे समीपे स्थितं तं नलं सत्यमेव आलम्बत। किंभूता[2]। प्रसूः माला तस्याः सकाशात् प्रसादेन अधिगता। मात्रा दत्ता माला[3]॥४९॥

स्रग्वासना दृष्टजनप्रसाद: सत्येयमित्यद्भुतमाप भूप:।
क्षिप्तामदृश्यत्वमितां च मालामालोक्य तां विस्मयते स्म बाला॥५०॥

[1]स्रग्वासनेति। भूपो[2] नलः इति कारणात् अद्भुतम् आश्चर्यम् आप। इयं दमयन्ती भ्रान्तिमध्यगताऽपि सत्या। किंभूता। स्रजो मालाया वासनया श्रद्धया[3] दृष्टो जनस्य दमयन्तीलक्षणस्य प्रसादो येन स तथा। अनया मम माला अर्पिता। अत: प्रसन्ना सत्या च। बाला च तां क्षिप्तां मालाम् अदृश्यत्वम् इतां प्राप्तां च आलोक्य विस्मयते स्म[4]॥५०॥

अन्योन्यमन्यत्रवदीक्षमाणौ परस्परेणाऽध्युषितेऽपि देशे।
आलिङ्गितालीकपरस्परान्तस्तथ्यं मिथस्तौ परिषस्वजाते॥५१॥

1 P. प्रसूः। 2 P. किं कृत्वा॥ 3 P. add. अत्र मालाशब्देनैव गतार्थे प्रसूनपदमुत्कर्षस्य प्रतिपत्त्यर्थम् उत्कृष्टानां प्रसूनानां मालेत्यर्थः। यथा लोके प्रायशः पुष्पमालैव कन्यका कं न लोभयेत। ननु मालाशब्दोऽन्यत्रापीति दृश्यते। यथा रत्नमाला शब्दमाला इति। सत्यम्। दृश्यते। किन्तु उपचारीस प्रयोग:। निरुपपादो हि मालाशब्द: पुष्परचनाविशेषमेवाऽभिधत्ते इति॥४९॥

1 P. स्रग्वासनेत्यादि। 2 P. नृपो 3 P. add. वा वासनया 4 P. add. अनुप्रास:॥५०॥

सर्ग ६ 28

अन्योन्यमिति[1] तौ[2] दमयन्तीनलौ मिथः परस्परं तथ्यं सत्यमेव अबाध्यं परिषस्वजाते। क्व ?। आलिङ्गितालीकपरस्परान्तः। आलिङ्गितं च यत् अलीकं परस्परं तस्य अन्तर्मध्ये अलीकालिङ्गन-मध्ये सत्यमालिङ्गनं जातम्[3]। किं कुर्वाणौ ?। अन्योन्यम् अन्यत्रेव[4] अन्यप्रदेशे स्थिताविव ईक्षमाणौ विलोकयन्तौ। क्व ?। परस्परेण[5] देशेऽध्युषितेऽपि आश्रितेऽपि। एकत्र देशे[6] स्थितावपि सत्यापपि तौ यथा नित्यं[7] भ्रान्त्या मिथ्यालिङ्गनमनुभवतः। तथैव आज्ञानं भ्रान्त्या[/म] आलिङ्गितं मन्येते स्म। परभ्रान्तिरपि यस्मा(३९०)त् भ्रान्तिकाले सत्या इव भवति। यथा स्वप्नः[8] स्वप्नव्यवहारकाले सत्यः पश्चात् बाध्यो भवति। तथा अलीकालिङ्गनमपि तत्काले सत्यं पश्चात् बाध्यम्[9]। यथा च शुक्तिरजतं तत्काले सत्यम्। पश्चात् बाध्यम्। परमयं विशेषः। भ्रान्त्या दृश्यमानस्य शुक्तिरजतादेरीदृशं भयं भवति। यदिदं क्षणेन यदि बाध्यं भविष्यति तदा मम रजतप्राप्तिर्न[10] भविष्यति। अत्र तु सत्यालिङ्गनेऽपि भ्रान्त्यालिङ्गनसदृशी प्रतीतिर्जाता। अत्र वादिनां विप्रतिपत्तिः[11]।

---

सत्ख्यातिवादी[12] साङ्ख्यः भ्रान्तौ शुक्तिमस्तके यत् रजतं ख्याति[13] प्रतिभासते तत्सदेव। क्वाऽपि विद्यमानमेव। असत्ख्या-तिवादी बौद्धः शून्यवादी माध्यमिकः— असदेव शून्यं रजतं भ्रान्त्या ख्यातिः। अन्यथाख्यातिवादी नैयायिको भाट्टश्च[14]— अन्यथा वर्तमानं

---

1 P. अन्यो। 2 P. दमयन्तीनलौ तौ 3 P. add. अथवा आलिङ्गितालीकपरस्परम् अन्तश्चित्तं यत्परिष्वङ्गो इति क्रियाविशेषणं तथ्यविशेषणं वा। गृहीतालीक-मैत्रीचित्तेन नलेन सत्या मैत्री आलिङ्गिता। अलीकनले विषक्तचित्तया भैम्या च सत्यनल आलिङ्गितः। अत्र हेतुगर्भं विशेषणम्। 4 P. अन्यत्र 5 P. अपर० 6 P. om. देशे 7 P. add. मिति 8 P. om. स्वप्नः 9 P. बाध्यो 10 P. om. न 11 P. वा 12 P. सङ्ख्या० 13 P. ख्याति 14 P. भाट्टश्च

रजत भ्रान्ति दोषवशात् पुरोवर्तिदेशे शुक्तिमस्तके अन्यथाख्यातिः[15]।
यतः तस्य मते अभावोऽपि भावात्मकः। इह भूतले घटाभावो नास्तीत्यु-
क्तौ घटाभावो[16] नाम भूतलम्। न तु सर्वथाऽभावः। तथा इदं रजतमित्यत्र।
भ्रान्तौ नेदं रजतमित्यनेन बाधकज्ञानेनाऽन्यथाभावमात्रं बाध्यते न तु
रजतम्। तथा अनिर्वचनीयख्यातिवादी वेदान्ती। इदं रजतं सन्न भवति
बाध्यत्वात्[17]। तथा असदपि न भवति प्रतीयमानत्वात्। तथा सदसदपि
न भवति भावाभावयोः परस्परविरोधात्। न च सदसद्भ्यामपरप्रकारोऽप्यका-
स्ति। तस्मात् केनापि प्रकारेण निर्वक्तुमशक्यत्वात् अनिर्वचनीयं
रजतं ख्यातिः[18]। अख्यातिवादिनः प्राभाकराः। इदं रजतं न ख्याति न
प्रातिभासिकं भाति। किन्तु सत्यमेव। यद्वैते ग्रहणस्मरणे[19] द्वे ज्ञाने
सत्ये। तथा हि- वणिग्वीथ्यादौ कान्ताकङ्कणादौ च गृहीतं सत्
चाकचिक्यादिश्वेतभास्करत्वादिसादृश्यात् पूर्वानुभवसंस्कारोद्बोधे
सति शुक्तिमस्तके तदेव रजतं स्मृतम्। ततो द्वयमपि सत्यम्। इदं
पुरोवर्ति सत्यं रजतम्। पूर्वानुभवात् स्मृतं तदपि सत्यम्।

---

अयं श्लोकः प्राभाकराभिप्रायेण[20] कविना कृतः।
अन्योन्यमन्यत्रवदीक्षमाणौ[21] तौ दमयन्तीनलौ मिथः परस्परं तथ्यं
परिषस्वजाते। कथं? आलिङ्गितस्य अलीकस्य परस्परस्याऽन्त[22]-
र्मध्ये यत् लोके सम्प्रतिपन्नम्। इदं परस्परं[23] मिथुनम् अलीका-
लिङ्गितं तस्मिन् तथ्यं परस्परमालिङ्गितं बभूव। यतः आरोपित-
रूपेण परस्परेण अध्युषितेऽपि[24] पुरोवर्तिनि देशेऽन्योन्यम् अन्यत्र-

---

15 P. add. भ्रान्ति 16 P. घटो नाम 17 P. बोध्यत्वात् 18 P. ख्यात्यख्याति०
19 P. ०स्मरणाविनाशे 20 P. प्रभा० 21 P. ०मन्यत्र च वीक्ष० 22 P. परस्परं 23 P. परस्परमिथुनं 24 P. om. पुरोवर्तिनि .... नलेन त्वापि।

यत् भ्रान्तिस्थलत्वं दर्शमाणौ जानन्तौ । अयमर्थः — तत्पूर्वमन्यत्र देशे च नलेन क्वापि सत्यालिङ्गनमनुभूतं गृहीतम् । दमयन्त्या च सखीभिः सहालिङ्गनमनुभवगृहीतम् । नदेवेदम् अध्युषितदेशे स्मृतम् । अतोऽन्योन्यालिङ्गनग्रहणज्ञानं स्मरणज्ञानं च उभयमपि तथ्यमेव न तु मिथ्या । अतस्तथ्यो[25] मिथ्या परिष्वङ्गः स्मरणज्ञानस्यार्थः [26]बाधितत्वात् इति मीमांसकैकदेशिनां प्राभाकराणामाशयः । अतोऽन्योन्यपरस्परमिथःशब्दानाम् अपौनरुक्त्यम् । अन्योन्यशब्दः एकः पूर्वानुभूतालिङ्गनवाची । अपरः[27] परस्परशब्दः पुरोवर्तिनि देशे स्मरणज्ञानवाचकः । तृतीयः अपरवादिनां[28] सम्प्रतिपन्नाम् अलीकतां भ्रान्तिसंसर्गानुपं[29] ग्रहणस्मरणज्ञानयोरेकत्र मेलकः । चतुर्थो मिथःशब्दः प्राभाकरसिद्धान्तसिद्धां[30] प्रतिज्ञां प्रतिपादयति[31] । अतः सर्वप्रकारेण तथ्यं मिथस्तौ परिषस्वजाते[32] ॥५१॥

स्पर्शं तमस्याऽधिगताऽपि भैमी मेने पुनर्भ्रान्तिमदर्शनेन ।
नृपः स पश्यन्नपि तामुदीतस्तम्भो न धर्तुं सहसा शशाक ॥५२॥

[स्पर्शं[1] तमस्येति । भैमी तम् अस्य नलस्य[2] स्पर्शम् अधिगताऽपि प्राप्ताऽपि सती अदर्शनेन अदृश्यतया पुनर्भ्रान्तिं मेने । स नृपः तां पश्यन्नपि सहसा धर्तुं न शशाक । किंभूतः ? उदीत उत्पन्नः स्तम्भः सात्त्विकभावो यस्य स तथा[3] ॥५२॥]

25 P₂ तथ्यं 26 P₁ °बोधितत्वात् 27 P₁ आपरं 28 P₂ om. वा 29 P₁ अनुपं 30 P₂ om. °सिद्धान्त° 31 P₂ om. प्रतिपादयति 32 P₁ add. अनुप्रासः । तृतीयपादस्य पञ्चान्तरव्याख्याने हेतुरपि ॥५१॥

1 P₁ स्पर्शं ता 2 P₂ om. नलस्य 3 P₁ add. काव्यलिङ्गं भावोदयः ॥५२॥

सर्ग ६ 31

स्पर्शातिरेकाहृतसत्यमत्या प्रवृत्त्य मिथ्या प्रतिलब्धबाधौ ।
पुनर्मिथस्तथ्यमपि स्पृशन्तौ न श्रद्दधाते पथि तौ विमुग्धौ ॥ ५३ ॥

[स्पर्शातिरेकेति[1] । तौ पथि[2] पुनः तथ्यं स्पृशन्तावपि न श्रद्दधाते न मेनाते । यतः विशेषेण मुग्धौ । किं कृत्वा ? । प्रथमस्य स्पर्शस्य अतिरेकेण आहृता[3] या सत्यमतिः सत्यबुद्धिः तया प्रवृत्त्य प्रवृत्तिं कृत्वा । तर्हि कथं न श्रद्धां दधतु[4] ? इत्याशङ्क्याऽऽह – मिथ्या ध्यानेन पूर्वमिथस्त्वेन सत्यत्वेऽपि प्रतिलब्धो बाधो याभ्यां तौ तथा । सत्यत्वस्य बाधितत्वात् मिथ्यात्वमेव[5] ज्ञातवन्तौ[6] ॥ ५३ ॥]

सर्वत्र संवाधमबाधमानौ रूपश्रिया तथ्यकरं[1] परं तौ ।
तु:/ न शेकतुः केलिरसान्निरन्तुमलीकमालोक्य परस्परं नु ॥ ५४ ॥

[सर्वत्र संवाधमिति[2] । तौ केलिरसात् क्रीडारसात् निरन्तुं निवर्तितुं न शेकतुः । नु पुनः परस्परम् अलीकम् आलोक्य । किं परस्परम्/ परस्परं[3] परं केवलं तथ्यकरं सत्यत्वकरम्[4] । यतः रूपश्रिया सर्वत्र संवाधम् । संमुह्यते[5] इति संवाधम् । न तु रूपेण क्वाऽपि परस्परं विसंवदतः[7] । किं भूतौ ? । अबाधमानौ । यदा स्पर्शाजन्य उत्तरज्ञानेन[8] ~~...~~ बाधमानौ भवतः तदा तथ्यं न स्यात् । तथाविधमपि सत्यं परस्परं क्रीडानुरागमोहेन अलीकमिव जानीतः स्म[9] ॥ ५४ ॥]

1 P. स्पर्श । 2 P. पथिकं 3 P. आद्रिता 4 P. चक्रतुः 5 P. ०मिव 6 P. add. उक्तनिमित्ता विशेषोक्तिः ॥ ५३ ॥

1 P. तथ्य० तिरूप० 2 P. सर्वा ; P. सर्वत्र शंसयामिति । 3 P. om. परं 4 P. add. आतिथ्यकरमिति क्वचित्पाठे लक्षणया दर्शनीयम् । 5 P. समुत्पद्यते 6 P. P. om. इति ; add. इति 7 P. संविदति 8 P. उत्तर० 9 P. add. अनुप्रासो हेतुश्च ॥ ५४ ॥

परस्परस्पर्शरसोर्मिसेकात् तयोः क्षणं चेतसि विप्रलम्भः।
स्नेहातिदानादिव दीपिकार्चि[1]र्निमिष्य किञ्चिद् द्विगुणं दिदीपे॥५५॥

[परस्परस्पर्शेति[2]। तयोः परस्परस्पर्श[3]स्य रसोर्मिसेकात् चेतसि क्षणं विप्रलम्भो रसो वियोगशृङ्गारः किञ्चित् निमिष्य शान्तो भूत्वा पुनर्द्विगुणं दिदीपे। किमिव? यथा दीपिकाया अर्चिः स्नेहस्य तैलस्य अतिदा[4]नात् किञ्चित् निमिष्य द्विगुणं दीप्यते[5]॥५५॥]

वेश्माप सा धैर्यवियोगयोगाद्बोधं च मोहं च मुहुर्दधाना।
पुनः पुनस्तत्र नृपः स पश्यन् बभ्राम तां सुभ्रुवमुद्भ्रमेण॥५६॥

[वेश्माप[1] सेति। सा दमयन्ती वेश्म गृहम् आप। किं कुर्वाणा? धैर्ययोगाद् वियोग[2]योगाच्च यथाक्रमं बोधं च मोहं[3] च मुहुर्दधाना। स नलः पुनरुद्भ्रमेण भ्रान्त्या तां सुभ्रुवं पुनः पुनः पश्यन् तत्र[4] बभ्राम[5]॥५६॥]

पद्भ्यां नृपः सञ्चरमाण एष चिरं परिभ्रम्य कथं कथञ्चित्।
विदर्भराजप्रभवानिवासं प्रासादमभ्रङ्कषमाससाद॥५७॥

[पद्भ्यां[1] नृप इति। एष नृपः पद्भ्यां सञ्चरमाणः सन् कथं

1 k+ot व्दीपका° 2 P. परस्प। 3 P. परस्परं 4 P2 दानात् अति 5 P. add. दीपि(पो)कार्चिरिति पाठान्तरम्। काव्यलिङ्गमुपमा च॥५५॥
1 P. वेश्मा; P2 विस्माप सेति। 2 P2 धैर्ययोगाच्च यथा 3 P2 दधाना मोहं च मुहुः 4 P2 om. तत्र 5 P. add. तत्र पुरः स इति पाठान्तरम्। अनुप्रासो यथासङ्ख्यं भावशबलता च॥५६॥
1 P. पद्भ्यां।

सर्ग ६ 33

कथाञ्चन चिर परिभ्रम्य प्रासादम् आससाद[3] । किं भूतम् ? । विदर्भ-राजप्रभवाया[4] भूभृत्सुताया[5] निवासम् । तथा अभ्रङ्कषम् उच्चैस्तरम्[6][7] ॥ ५५ ॥

सखीशतानां सरसैर्विलासैः स्मरावरोधभ्रममावहन्तीम् ।
विलोकयामास सभां स भैम्यास्तस्य प्रतोलीमणिवेदिकायाम् ॥ ५६ ॥

[सखीशतानामिति[1] । स भैम्याः सभां तस्य प्रासादस्य[2] प्रतोली प्रवेशमार्गस्तत्र या मणिमयवेदिका[3] तस्यां विलोकयामास । किं भूताम् ? । सखीशतानां सरसैर्विलासैः स्मरस्य अवरोधस्यान्तःपुरस्य[4] भ्रमं[5] भ्रान्तिम् आवहन्तीम्[6] ॥ ५६ ॥]

कण्ठः किमस्याः पिकवेणुवीणास्तिस्रो जिताः सूचयति त्रिरेखः ।
इत्यन्तरस्मूयत यत्र काचिन्नलेन बाला कलमालपन्ती ॥ ५७ ॥

[कण्ठः[1] किमस्या इति । यत्र सभायां काचिद्बाला नलेन कलं मधुरम् आलपन्ती सती इति अन्तर्मध्ये[2] अस्मूयत[3] । इतीति किम् ? । अस्या बालायाः कण्ठस्त्रिरेखो[4] रेखात्रयाङ्कमिषेण तिस्रः पिको[5] वेणुर्वंशश्च वीणा च एता जिताः सूचयति । अतिमाधुर्यात्[6] ॥ ५७ ॥]

2 P. प्रसादम् 3 P. add. समस्तलीपाद्युक्तादि (पा० I iii 54) त्यात्मनेपदम् । शानच् । 4 P. प्रभावाया 5 P. add. भीम० 6 P. उच्चैः 7 P. add. अनुप्रासः ॥ ५५ ॥

1 P. सखी । 2 P. प्रसादस्य 3 P. मणिमया 4 P. add. नाम 5 P. om. भ्रान्तिम् 6 P. add. अनुप्रास उपमा च ॥ ५६ ॥

1 P. स कण्ठ । 2 P. om. अन्तर्मध्ये 3 P. इति किम् ! 4 P. रेखाः 5 P. पिक 6 P. add. अनुप्रास उत्प्रेक्षा च ॥ ५७ ॥

एवं नलं तं दमयन्ति पश्य त्यजाऽऽर्तिमित्यालिकुलप्रबोधान् ।
श्रुत्वा स नारीकरवर्तिसारीमुखात्स्वमाशङ्कत यत्र दृष्टम् ॥६०॥

[एवं नलमिति[1] । यत्र सभायां स नलः स्वम्[2] आत्मानं दृष्टम्[3] आशङ्कत । किं कृत्वा ? । कस्याश्चित्[4] नार्याः करवर्तिन्याः हस्तस्थितायाः सार्याः सारिकाया मुखात् इति[5] ईदृशान् आलिकुलप्रबोधान् श्रुत्वा । इतीति[6] किम् ? । हे दमयन्ति ! एवं नलं पश्य[7] आर्तिं त्यज । यदा दमयन्ती विरहाकुला भवति तदा सख्यस्तां प्रबोधयन्ति । त्वम् एवं[8] नलं पश्य । ईदृशं प्रबोधं सारिका श्रुत्वा यदा पुनः पुनर्वदति तदा नलस्य दृष्टोऽस्मीति शङ्काऽजायत[9] ॥६०॥]

यत्रैकयाऽलीकनलीकृतालीकण्ठे मृषाभीमभवीभवन्त्या ।
तद्‌दृक्पथे दौरदिकोपनीता शालीनमाधायि मधूकमाला ॥६१॥

[(399) यत्रैकयेति[1] । यत्र सभायाम् एकया सख्या अलीकनलीकृता चासौ आली च तस्याः कण्ठे शालीनं सलज्जं यथा भवति एवं मधूकमाला वरणस्रक् आधायि आरोपिता । किं भूतया सख्या ? । मृषाभीमभवीभवन्त्या अलीकदमयन्तीभूतया । एका सखी दमयन्तीरूपा जाता । अपरा सखी नलरूपा जाता । क्व ? । तस्य[2] नलस्य दृक्पथे । तस्य पश्यतः सतः । किंभूता ? । दौरदिकैः[3] वाटिकापालैः[4] इच्छावर्तिभिः उपनीता ढौकिता । यो दोहदान् दत्ते सः[5] दौरदिकः[6] ॥६१॥]

P2/ 1 P1 एवं । ~~P2~~ एवं नलमिति । 2 P2 add. शत्या 3 P2 add. भणित्वा 4 P2 नार्याः कस्याश्चित् 5 P1 इति किम् । 6 P2 एवं तं 7 P1 प्रतिबोध० 8 P2 एवं 9 P1 add. श्रुत्वा 10 P1 add. भावोदयः ॥६०॥ 1 P1 यत्रै । 2 P1 add. तस्या भीमभवाया अथवा 3 P2 add. या 4 P2 पालिकया उपनीता 5 P2 om. स दौरदिकः 6 P1 add. इच्छावर्तित्वात् वा । अनुप्रासः ॥६१॥

चन्द्राभमाभ्रं तिलकं दधाना तद्भालजास्येन्दुकृतानुबिम्बम्।
सखीमुखे चन्द्रसमे ससर्ज चन्द्रानवस्थामिव कापि यत्र ॥६२॥

[चन्द्राभ[1]माभ्र[2]मिति। यत्र सभायां कापि सखी चन्द्रेण समे सख्याः मुखे आभ्रम् अभ्रकस्येदम्[3] आभ्रम् अभ्रकसम्बन्धि तिलकं दधाना[4] ददाना सती चन्द्राणामनवस्थामिव बहुचन्द्रतामिव ससर्ज। किं विशिष्टे सखीमुखे? चन्द्रसमे। किंभूतं तिलकम्? चन्द्राभं चन्द्रसदृशम्। पुनः[5] किंभूतं तिलकम्? तद्भालं तेनाऽभ्रतिलकेन युक्तं यत् निजं तिलकधात्र्याः स्त्रियाः सम्बन्धि यत् आस्यमेव इन्दुः तेन कृतानुबिम्बम्। एकम् आभ्रं तिलकं चन्द्रः सखीमुखं चन्द्रः। द्वितीयायाः स्त्रियाः मुखं चन्द्रः। तत्राऽपि आभ्रं तिलकं चन्द्रः। एवम् उभयोरपि प्रतिबिम्बद्वयं चन्द्रः। प्रतिबिम्बस्याऽपि प्रतिबिम्बश्चन्द्रः। इत्थं चन्द्राणामनवस्था जाता[6] ॥६२॥]

दलोदरे काञ्चनकेतकस्य क्षणान्मषीभावुकवर्णरेखम्।
तस्यैव यत्र स्वमनङ्गलेखं लिलेख भैमी नखलेखिनीभिः ॥६३॥

[दलोदरे[1] इति। यत्र सभायां भैमी तस्यैव नलस्यैव[2] कृते स्वम्[3] अनङ्गलेखं काञ्चनकेतकस्य दलोदरे पत्रमध्ये नखाः एव लेखिन्यस्ताभिर्लिलेख। किंभूतम्? क्षणात् मषीभावुकाः कृष्णवर्णा भवन्त्यो
तत्र वर्णानाम् अक्षराणां रेखा यत्र तं तथा। केतकपत्रे या रेखा क्रियते सा तदैव कृष्णवर्णा भवति[4] ॥६३॥]

1 P. चन्द्राभ° 2 P. °माभ्र° 3 P. अभ्रकस्य अभ्रसम्बन्धि 4 P. ददाना। दधाना S
P. किं पुनर्भूतं 6 P. add. अनुप्रास उपमा रूपकमुत्प्रेक्षा च ॥६२॥ 1 P. दलो।
2 P. om. एव 3 P. om. स्वम्; P. स्वयम् 4 P. add. अनुप्रासो रूपकं च ॥६३॥

विलेखितुं भीमभुवो लिपीषु सख्याऽतिविख्यातिभृताऽपि यत्र ।
अशाकि लीलाकमलं न पाणिरपारि कर्णोत्पलमक्षि नैव ॥६४॥

[विलेखितुमिति[1] । यत्र सभायां भीमभुवो[2] लिपीषु दम-यन्त्याम् आलेख्यमानायाम्[3] अतिविख्यातिभृताऽपि प्रसिद्धया चित्र-कारिकयाऽपि[4] सख्या भैम्याः हस्तस्थितं लीलाकमलं विलेखितुम् अशाकि शक्तम् । न पाणिर्लेखितुं शेके । तथा कर्णोत्पलं चित्रयितुम् अपारि । नैव अक्षि लेखितुं शक्तम्[5] ॥६४॥]

भैमीमुपावीणयदेत्य यत्र कलिप्रियस्य प्रियशिष्यवर्गः ।
गन्धर्ववध्वः स्वरमध्वरीणास्तत्कण्ठनालैकधुरीणवीणाः ॥६५॥

[भैमीमुपेति[1] । यत्र सभायां गन्धर्वाणां वध्व एव प्रियशिष्य-वर्गा एत्य आगत्य भैमीम् उपावीणयत् वीणया अलोभयत् । कस्य छात्र-वर्गः ?[2] कलिप्रियस्य कलहप्रियस्य नारदस्य । किं भूताः ? स्वर एव मधु[3] अतिमधुरत्वात् तेनाऽरीणोऽक्षीणो यस्तासां[4] कण्ठनालस्तेन एकधुरीणा समाना वीणा यस्य स तथा । (एकधुराल्लुक्च (पा० IV. iv. 79) इति । आयनेयी[5] (पा० VII. i. 2) ति ईनः[6] ॥६५॥]

1 P. विलो । 2 P. भुवो 3 P. add. लिपीषु चित्रेषु 4 P. add. भीमभुवः
5 P. add. अनुप्रासो विरोधः परिसङ्ख्या प्रतीपं च ॥६४॥

1 P. भैमी । 2 P. om. किं भूताः ? 3 P. इति 4 P. add. तस्या वा
5 P. add. आयनेयीनीयियः फढखछघां प्रत्ययादीनामिति 6 P. add.
अनुप्रासो रूपकमुपमा च ॥६५॥

नावा स्मरः किं हरभीतिगुप्तेः पयोधिरे खेलति कुम्भ एव।
इत्यर्धचन्द्राभनखाङ्कचुम्बिकुचा सखी यत्र सखीभिरूचे ॥६६॥

[नावा[1] स्मर इति। यत्र सभायां सखीभिः काञ्चित् सखी इति ऊचे। किंभूता। अर्द्धचन्द्राभ[2]नखाङ्कचुम्बी कुचो यस्याः। नखाङ्कं चुम्बति इति। णिनिः। इत्याह किमी। किं स्मरः ते पयोधिरे स्तने कुम्भे एव नावा[3] वेड्या[4] नखाङ्कछलात् खेलति। कुतः। हरात् या भीतिः भयं तस्याः गुप्ते रक्षणात्। कुम्भ एव निलीनः[5] खेलति। अथवा इति बुध्या यत् पार्वतीभयेन हरस्तां स्त्रियं[6] न पश्यति। अथवा हरोऽपि त्व-[7]द्दर्शनमोहितो न तराम इत्यभिप्रायेण निर्भयः। अथ च पय उदकं धरतीति[8] पयोधिरो जलाशयस्तत्र नावा खेलति[9] ॥६६॥]

स्मराशुगीभूय विदर्भसुभ्रूवक्षोऽपि यद्भेदि खलु प्रसूनैः।
स्रजं सृजन्त्या तदशोधि तेषु यत्रैकया सूचिशिखां निखाय ॥६७॥

[स्मराशुगीभूयेति[1]। खलु इति शङ्के। यत् प्रसूनैः पुष्पैः स्मरस्य आशुगीभूय बाणत्वं प्राप्य विदर्भसुभ्रूवक्षः भैमीहृदयमभेदि। यत्र सभायाम् एकया सख्या स्रजं सृजन्त्या गुम्फन्त्या तेषु पुष्पेषु सूच्याः शिखां तीक्ष्णाग्रं निखाय प्रोतं कृत्वा तद्वैरमशोधि[2] ॥६७॥]

यत्राऽवदत्तामतिभीय भैमी त्यज त्यजेदं सखि! साहसिक्यम्।
त्वमेव कृत्वा मदनाय दत्से बाणान् प्रसूनानि गुणेन सज्जान् ॥६८॥

1 P. नावा। 2 P2 ०चन्द्राभैः 3 P. add. नाऽन्यत्र 4 P. वेड्या 5 P2 निमीलः 6 P2 प्र० 7 P. ०दर्शि० 8 P2 om. पयोधिरो... खेलति 9 P. add. अनुप्रास उपमा रूपकमुत्प्रेक्षा च॥६६॥ 1 P. स्मरा। 2 P. add. अनुप्रास उत्प्रेक्षा च ॥६७॥

सर्ग ६ 38

[1 पत्राऽवददिति। पत्र मैत्री अतिशयेन मीत्या एतां मालां
2 ग्रथ्नन्तीम् अवदत्। हे सखि! इदं साहसिक्यं त्यज त्यजे[4] यतः त्वमेव
प्रसूनानि बाणान् गुणेन मौर्व्या[5] सज्जान्[ ] कृत्वा मदनाय दत्से अर्पयसि[6]।
अथ दोरकेण सज्जान् प्रोतान् कृत्वा मदनाय दत्से अर्पयसि[7]॥६९॥

आलिङ्ग्य सख्याः कुचपत्रभङ्गीमध्ये सुमध्या मकरी करेण।
यत्राऽऽलपत्तामिपमालि! यानं मन्ये त्वदेकावलिनाकनद्याः॥६९॥

[1 आलिङ्ग्येति। यत्र काञ्चित् सुमध्या कस्याश्चित्
सख्याः कुचयोः पत्रभङ्गीमध्ये करेण मकरीम् आलिङ्ग्य तां सखीम्
आलपत् हे आलि![3] इयं मकरी तव एकावली हार एव नाकनदी गङ्गा
तस्याः यानं वाहनम् इत्यहं मन्ये। गङ्गाया हि मकरवाहनत्वम्[4]॥६९॥

तामेव सा यत्र जगाद भूयः पयोधियादः कुचकुम्भयोस्ते।
सेयं स्थिता नावककृद्व्ययाङ्कप्रियास्तु विस्तारयशः प्रशस्तिः॥७०॥

[1 तामेव सेति। यत्र सखीयां तामेव सखीं सा पत्रवल्ली-
कर्त्री सुमध्या भूयो जगाद। हे सखि! सा इयं पयोधियादो मकरी नावक-
स्य हृद्व्ययस्य अङ्को मकरस्तस्य प्रिया। तव कुचकुम्भयोः विस्तार-
यशसः प्रशस्तिरस्तु। किं भूता?[3] स्थिता रचिता[4]॥७०॥

1 P. यत्रावदत्। 2 P. ग्रथ्नत्यपि त्री 3 P. साहसिकं 4 P. om. त्यज; P. add. इति वीप्सा-
या भयानुभावः 5 P. दोरकेण सज्जान् प्रोतान् अथ च मौर्व्या 6 P. अर्पयति
7 P. add. अतिशयोक्तिः। गुणशब्दः श्लिष्टः॥६९॥ 1 P. text जाने 2 P. आलि-
ङ्ग्य 3 P. हे सखि! 4 P. add. अनुप्रासो रूपकं च॥६९॥ 1 P. तामेव 2 P.
वल्ली 3 P. add. कुचकुम्भयोः अपि पठ. नावकहृद्व्ययाङ्कप्रिया अस्तु इति वा हि
विधेयम्। अनुप्रासो रूपकं च॥७०॥

सारीं चरन्तीं सखि! मारयैतामित्यक्षदाये कथिते कयाऽपि।
यत्र स्वघातभ्रमभीरुसारीकाकूत्थसाकूतहसः ससर्जे ॥७१॥

[सारीमिति। यत्र सभायां स्वस्याऽऽत्मनो घातभ्रम: हननभ्रान्ति: तेन भीरु: सभया या सारी सारिका तस्या: काकुस्वर: दीनस्वर: तस्य उत्थ उत्थानेन उत्पत्तिस्तेन साकूत: साभिप्रायो हसोऽथवा काकुर्दीनस्वर: तस्मादुत्थम् उत्थानं यस्य हसस्य स तथाविध: साकूत: साभिप्रायो हस: प्रहास: ससर्जे सञ्जात:। क्व सति? कयाऽपि सख्या इति ईदृशे अक्षस्य पाशकस्य दाये कथिते सति। इतीति किम्? हे सखि! एतां चरन्तीं सारीं द्यूतफलके मण्डितां मारय। अथ च चरन्तीं भ्रमन्तीं सारिकां नाम पक्षिणीं मारय — इत्युक्ते सा पक्षिणी शुकवत् पटुवचनत्वात् काकुस्वरेण भयेन वदन्ती इयं वा यत् मां मारयिष्यतीति सखीनां हास:। अभिप्रायोऽयम् — द्यूतफलके रमणार्थं काष्ठमयी सारी साऽपि पाशके पतिते सति दानसङ्ख्यावशात् गृहात् गृहं चरति ॥७१॥]

भैमीसमीपे स निरीक्ष्य यत्र ताम्बूलजाम्बूनदहंसलक्ष्मीम्।
कृतप्रियाकृत्यमहोपकारमराललोभाद्रदिमानमूहे ॥७२॥

[भैमीसमीपे इति। यत्र सभायां स नल: भैम्या: समीपे

1 P. सारीम् । 2 B. om. तस्य.... दीनस्वर: 3 B. om. हसस्य... पाशकस्य 4 P. इति किम्?। B. om. इतीति किम्? । 5 P. add. गच्छन्तीं चरं कुर्वन्तीं काऽनया सारिकया चरो भवति इति 6 P. add. भेडयन्तीं वा सारीं 7 P. पक्षिणं 8 P. पाशके पाशपतिते 9 B. om. गृहात् 10 P. add. भावोदय: श्लेषश्च ॥७१॥ 1 P. भैमीसमीपे।

सर्ग ६ 40

ताम्बूलार्थं यो जाम्बूनदस्य सुवर्णस्य हंसः तस्य लक्ष्मीं शोभां निरीक्ष्य दृष्ट्वा कृतः प्रियायाः कृत्यलक्षणो महोपकारो येन स चाऽसौ मरालो हंसश्च तस्य मोहो भ्रान्तिस्तस्य प्रदिमानं हठत्वम् ऊहे ऊढवान् । स एवाऽयं हंस इति प्रत्यभिज्ञा भ्रान्तिर्जाता[3] ॥७२॥

तस्मिन्नियं सेति सखीसमाजे नलस्य सन्देहमथ व्युदस्यन् ।
अपृष्ट एव स्फुटमाचचक्षे स कोऽपि रूपातिशयः स्वयं ताम् ॥७३॥

[[1]तस्मिन्निति । अथ तस्मिन् सखीसमाजे स प्रसिद्धः
च/ कोऽपि [2]अनिर्वचनीयतया अविमृश्यमानो रूपातिशयः स्वयं तां दमयन्तीम् अपृष्ट एव सन् आचचक्षे कथयामास । कथम् ? इयं सा दमयन्ती । किं कुर्वन्[3] ? नलस्य सन्देहं व्युदस्यन् निराकुर्वन्[4] ॥७३॥]

भैमीविनोदाय मुदा सखीभिस्तदाकृतीनां भुवि कल्पितानाम् ।
जाऽतर्कि मध्ये स्फुटमप्युदीतं तस्याऽनुबिम्बं मणिवेदिकायाम् ॥७४॥

[[1]भैमीविनोदायेति । तस्य नलस्य अनुबिम्बं मणिवेदिकायां स्फुटम् उदीतमपि केनाऽपि न अतर्कि न ज्ञातम् । क्व उदितं प्रतिबिम्बम् ? भैम्या विनोदाय सखीभिर्मुदा कल्पितानामालेखितानां तस्य नलस्य आकृतीनां चित्रप्रतिकृ[2]तीनां मध्ये[3] पतितत्वात्तदपि चित्रमेवेति[4] शङ्का जाता ॥ ॥७४॥]

2 B lectio. int. lin. mg. add. भाग्यवतां हि गृहेषु पत्रपुगादिनिक्षेपार्थं स्वर्णमयो हंसो विधीयते यतस्तत्रैव । 3 B. add. अनुप्रासो भ्रान्तिमांश्च ॥७२॥
1 B. तस्मिं । 2 B निर्वचनीयतया 3 B कथयन् 4 B. add. अतिशयोक्तिः ॥७३॥
1 B. भैमी । 2 B. ० प्रकृतीनां 3 B. add. तन्मध्ये 4 B. प्रतीतिः, and add. मीलितं विशेषश्च ॥७४॥

हुताशकीनाशजलेशदूतीर्निराकरिष्णोः कृतकाकुयाच्ञाः ।
भैम्या वचोभिः स निजां नदाशां व्यावर्तयद्दूरमपि प्रयाताम् ॥७५॥

[हुताशकीनाशेति[1] । स नलस्तदा भैम्या[2] वचोभिर्निजां नदाशां[3] तस्याः सम्बन्धिनीमाशां दूरं प्रयातामपि व्यावर्तयत्[4] । दमयन्तीवचनश्रवणात् आत्मनः तत्प्राप्तिमनोरथो व्यावृत्तो नीतः । [5]यः किल यस्य भवति स तस्य वचनेन निवर्तते[6] । किंभूतायाः ? हुताशस्य कीनाशस्य यमस्य[7] जलेशस्य च दूतीः सर्वा अपि निराकरिष्णोः[8] । किंभूतास्ताः ? कृता काकुना दैन्येन याच्ञा याभिः तास्तथा । हुतं सर्वं भक्षयति । अपरः कीनाशः कदर्यः । तृतीयो जडानामीशः । अतो निराकरणम्[9] ॥७५॥]

विज्ञप्तिमन्तः सभयः स भैम्या मध्येसभं वासवसम्भलीयाम् ।
सम्भालयामास भृशं कृशाशस्तदालिवृन्दैरभिनन्द्यमानाम् ॥७६॥

[विज्ञप्तिमिति[1] । स नलः आत्तः[2] सभयः सन् मध्येसभं वासवस्येन्द्रस्य[3] सम्भलीं कुट्टिनीं दूतीं तत्सम्बन्धिनीं विज्ञप्तिं[4] सम्भालयामास शुश्राव[5] । किंभूतः ?[6] भृशं कृशा आत्मनो दमयन्तीप्राप्तिलक्षणा आशा यस्य स तथा । इन्द्रे प्रार्थयितरि नलस्य कृत आशा । किंभूताम् ? तस्या आलीनां सखीनां वृन्दैः अभिनन्द्य-

1 ॥ हुता । 2 ॥ भैमी० ; ॥2 तस्याः 3 ॥2 om. नदाशां ... सम्बन्धिनीम् 4 ॥ व्यवर्तयत् 5 ॥2 om. यः ... निवर्तते 6 ॥ add. आशा च दमयन्त्या आत्मस्त्वचोभिर्निवर्तनमुचितम् 7 ॥2 च here - 8 ॥ add. न लोकाव्यय (पा० II.iii.69) इति षष्ठीप्रतिषेधः । 9 ॥ add. अनुप्रासः ॥७५॥ // 1 ॥ विस । 2 ॥ add. कदाचिदिन्द्रः [illegible] कुर्यात् । [illegible] किं भवेदिति भैम्याम् 3 ॥ वासवेन्द्रस्य 4 ॥ add. उक्तं नद्धतीनां तिसृणामपि 5 ॥ add. पारे मध्ये षष्ठ्या वा (पा० II.i.18) इति अव्ययीभावः ।

सर्ग ६ 42

मानाम्। सख्यः सर्वा अपि इन्द्रम् अनुजानन्ति ॥७६॥

लिपिर्न दैवी सुपठा भुवीति तुभ्यं मयि प्रेषितवाचिकस्य।
इन्द्रस्य दूत्यां स्वयं प्रसादं विज्ञापयन्त्यामवधानदानैः ॥७७॥

[लिपिर्न दैवीति। हे दमयन्ति। त्वं मयि इन्द्रस्य दूत्यां विज्ञापयन्त्यां सत्याम् अवधानदानैः प्रसादं रचय। किंभूतस्य? इति कारणात् प्रेषितं वाचिकं वचनेनैव सन्देशो येन तस्य तथा। कस्मै सन्देशः? तुभ्यम्। दमयन्त्यर्थमेवेत्यर्थः। कुतः? दैवी स्वर्गसम्बन्धिनी त्य लिपिरक्षरविन्यासरूपा भुवि पृथिव्यां न सुपठा पठितुं न शक्या। अतो मयि विषये वाचिकं दत्तं, न तु पत्रे लिखितम् ॥७७॥]

सलीलमालिङ्गनयोपपीडमनामयं पृच्छति वासवस्त्वाम्।
शेषस्त्वदाश्लेषकथाविनिद्रैस्तद्रोमभिः सन्दिदिशे भवत्यै ॥७८॥

[(31b) सलीलमिति। वासवः त्वां सलीलम् आलिङ्गनया उपपीडम् आलिङ्ग्य मयेति मया दूत्या कृत्वा उपपीडं गाढम् आलिङ्ग्य अनामयं कुशलं पृच्छति। पृच्छि द्विकर्मकः। उपपीडम्, सप्तम्यां चोपपीडरुधकर्षः (पा० III.iv.49) इति णमुल्प्रत्ययः। आलि-

7. P. add. अनुप्रासः ॥७६॥ 1. P. लिपि। 2. P. प्रेषितं 3. E. वचनेन च 4. E. om. ०विन्यास० 5. P. सुपाठा 6. P. लिखिता; and add. लिप्यते अनया पत्रं लिपिं नपादित्वात् पाते लिखिरित्यपि। काव्य-लिङ्गम् ॥७७॥

1. P. सलील। 2. E. om. आलिङ्गनया.... मयेति 3. P. add. त्वां 4. P. उपपीड-रुधकर्षश्च (पा० IV.vi.34) इति णम्।

सर्ग ६ 43

इत्यंत इन्द्रस्त्वयः [इह त्वामालिङ्गामि। इन्द्रस्त्वा मया आलिङ्ग्य याति/ मुग्धे] मयेत्यनिनन्तस्य कर्ता इनन्ते सत्यनुक्तकर्तृत्वात्तृतीया। शेषः सन्देशार्थः तस्य वासवस्य शोभाभिरेव भक्त्यै हे दमयन्ति! सन्दिदेश। किं भूतैः!। तव आश्लेषस्य कथामात्रेणैव विविद्धैः शोभाञ्चितैः। त्वं मां वरय इति सन्देशार्थः॥७८॥

यः प्रेर्यमाणोऽपि हृदा मघोनस्त्वदर्थनायां ह्रियमाप दागः।
स्वयंवरस्थानजुषस्तमस्य बधान कण्ठे वरणस्रजाऽऽशु॥७९॥

[यः प्रेर्यमाण इति। हे दमयन्ति! त्वं तम् अस्येन्द्रस्य कण्ठम् आशु वरणस्रजा स्वयंवरमाल्या बधान। किंभूतस्य!। स्वयंवरस्थानं जुषते इति क्विप्। स्वयंवरस्थानं सेवमानस्य। यः मघोनः इन्द्रस्य हृदा प्रेर्यमाणोऽपि त्वदर्थनायां विषये ह्रियमेव लज्जामेव आगः अपराधम् आपत। अग्रे अपूर्वत्वात् प्रार्थनां न कुरुते। अन्यच्च योऽपराधी स सर्वत्र बध्यते॥७९॥]

नैनं त्यज श्रीरधिमन्थनाद्यैरस्याऽनुजायोज्झितामरैः श्रीः।
अस्मै विमथ्याम्बुरसोदमन्यां श्राम्यन्तु मोत्थापयितुं श्रियं ते॥८०॥

[नैनं त्यजेति। त्वम् एनम् इन्द्रं न त्यज मा त्याक्षीः। यैः

5 l. इह 6 l2 om. मयेति 7 l2 नलस्य 8 l. add. इत्यग्रामेणाथैन च त्वद्विरहात् कामवशेन 9 l. add. स्थितः। अनुप्रासः॥७८॥
1 l. यः प्रेर्य। 2 l. यो मघोनः ... न कुरुते here 3 l2 om. स्वयंवरस्थानं 4 l. om. एव 5 l2 बध्यते 6 l. add. रूपकं समासोक्तिः॥७९॥
1 l. नैनं।

सर्ग ६ 44

अमरैः अस्याऽनुजाय उपेन्द्राय श्रीकृष्णाय त्वदर्थं श्री अब्धेः दुग्धसमुद्रस्य मन्थनात् श्रीलक्ष्मी: उद्रमिता उत्पादिता। ते देवा अस्मै इन्द्रार्थम् इक्षुरसोदम् इक्षुरससमुद्रं विमथ्य अन्यां श्रियम् उत्थापयितुं न श्राम्यन्तु मा श्रमं कार्षुः। त्वमेव लक्ष्मीर्भव[3] ॥८०॥

लोकस्रजि द्यौर्दिवि चादितेयास्तथादितेयेषु महान्महेन्द्रः।
किङ्करतैमधी यदि सोऽपि रागाज्जागर्ति कक्षा किमतः पराऽपि ॥८१॥

[1] लोकस्रजीति। तावत् लोकानां भूरादीनां सप्तानां स्रजि मालायां द्यौः स्वर्गं महती दिवि[2] आदितेया देवाः महान्तः आदितेयेषु अपि देवेषु मध्ये महेन्द्रो[3] महान्। एवमुत्तरोत्तरमुत्कर्षे यदि सोऽपि इन्द्रो[4] रागात् किङ्करतुं दासीभवितुम् अर्थी[5] जागर्ति। किं ते तव अतः पराऽपि काऽपि कक्षा प्रविष्टा[6] जागर्ति स्फुरति अपि तु न[7] ॥त॥

पदे शतेनाऽऽप मखैर्यदिन्द्रस्तस्मै स ते याचनचाटुकारः।
कुरु प्रसादं तदलं कुरुष्व स्वीकारकृत्सूनरनश्रमेण ॥८२॥

[1] पदे शतेनेति। यत् इन्द्रः पदे[2] स्थानं शतेन मखैर्यागैः आप स इन्द्रः तस्मै इन्द्रपदार्थं[3] ते तव याचने चाटुकारः[4]। त्वं दमयन्ति! प्रसादं कुरु। तत् इन्द्रपदं स्वीकारकृत् अङ्गीकर्तृ यत् भुवोनेरनं चकर्त

2 f2 om. इक्षुरस 3. add. अनुप्रास उदात्त आक्षिप्ता उपमा च ॥८०॥
1 f. लोका 2 f2 दिवि तथा देवा 3 f2 महेन्द्रो महान् 4 f2 इन्द्ररागात् 5 f. किङ्करो 6 f. add. कोटिः 7 f. add. अर्थादनागते अनुप्रास सारस्य विरोधोऽपि ॥८१॥ 1 f. पदे 2 f2 add. शतं 3 f2 ०पदाप्तो तव 4. f. add. चाटुवचनं यस्य। अथवा याचनेन चाटुकारः।

सर्ग ६ 45

वरस्य क्रमेण अत्के[5]कुरुष्व । अनुसा[6] भ्रसमया देहि ॥८२॥

मन्दाकिनीनन्दनयोर्विहारे देवे वरे[1] देवरि माधवे च ।
श्रेयः स्त्रियां यातरि यच्च सख्यां तच्चेतसा भाविनि ! भावयस्व ॥८३॥

[मन्दाकिनीति[2] । हे भाविनि[3] ! यत् श्रेयः कल्याणं सुखं चेतसा भावयस्व विचारय तत् सुखं मन्दाकिन्यां स्वर्गगङ्गायां[4] विहारे नन्दनवनक्रीडायां च भवति । यत् देवे महेन्द्रे वरे भर्तरि च सुखं, यद्वा, माधवे श्रीकृष्णे देवरि श्रेयः । देवृशब्दो देवरवाची ।[5] देवे भवे-दिति पाठे, यद्वा, देवे माधवे देवरि श्रेयो भवेदिति व्याख्या । यच्च सुखं स्त्रियां लक्ष्म्यां यातरि देवरपत्न्यां[6] सख्यां सत्यां भवति तद्विचारय । अथ वा मन्दाकिन्यां विहारे नन्दने च विहारे यत् श्रेयः तद्भावय ।

अयमर्थः — अग्न्यादीनां वरणे मन्दाकिन्यामेव विहारः, नन्दने । इन्द्रस्य तु[7] वरणे द्वयम् । अग्न्यादिवरणे देवो वरो[8] भवति, न तु माधवो देवरः । इन्द्रवरणे तु देवे वरे माधवे च देवरि अस्मिन् द्वये सति श्रेयो भावय । अग्न्यादिवरणे श्रीः सखी भवति, न तु याता । इन्द्रवरणे तु स्त्रियां सख्यां यातरि च श्रेयो भावय । नन्दनादित्रयस्येन्द्र-वरण एव भावात्[9] ॥८३॥]

5 P. अत्केऽकुरु 6 P. भ्रसंसा ; R असंसया 7 P. ववक हेतुः ॥८२॥
1 R नस्क भवेत् 2 P. मन्दाकिनी 3 R भामिनि 4 P. गङ्गायां 5 R om. देवे .... व्याख्या 6 R देवरान्यां 7 P. वरणे तु 8 P. om. वरो
9 P. ववव अनुप्रासो दीपके तुल्ययोगिता वा । व्याख्यान्तरे व्यतिरेकश्च ॥ ॥८३॥

रज्यस्व राज्ये जगतामितीन्द्राद् याच्ञा प्रतिष्ठा लभसे त्वमेव।
लघूकृतस्त्वं बलियाचनेन तत्प्राप्तये वामनमामनन्ति ॥८४॥

[रज्यस्वेति। हे रमयन्ति! त्वं जगतां राज्ये रज्यस्व इन्द्राणीमेव। इतीदृशीं याच्ञां प्रतिष्ठां सन्मुखप्रार्थनाम् इन्द्रात् त्वमेव लभसे। लोकाः तस्य राज्यस्य प्राप्तये। भूप्राप्तये इति पाठे भुवः पृथिव्याः पदत्रयमात्रतया[2] प्राप्तये लघूकृतस्त्वं लघूकृतम्[3] आत्मानं सन्तं श्रीकृष्णं वामनं नाम्ना आमनन्ति। केन लघूकृतस्त्वमित्याह — बलेर्याचनेन[4] ॥८४॥]

यानेव देवान्नमसि त्रिकालं न तत्कृतघ्नीकृतिरौचिती ते।
प्रसीद तानप्यनृणान् विधातुं पतिष्यतस्त्वत्पदयोस्त्रिसन्ध्यम् ॥८५॥

[यानेव देवानिति। त्वं यानेव देवान् त्रिकालं नमसि[2] तेषां कृतघ्नीकृतिः कृतघ्नत्वकरणं ते तव न औचिती न योग्या। त्वं तानपि अनृणान् विधातुं प्रसीद। किं करिष्यतः! त्वत्पदयोः त्रिसन्ध्यं पतिष्यतः। इन्द्राणी सर्वैर्देवैर्नमस्क्रियते। अग्रे त्वया देवा नताः इदानीं त्वां नमन्तीति कृतसत्त्वम्[3] ॥८५॥]

उत्कुकवत्या निहितादरेण भैम्या गृहीता मघवत्प्रसादः।
स्रक् पारिजातस्य श्रुते न्यत्कृशां वासैरशेषामपुपूरदाशाम् ॥८६॥

1. P. रज्यस्व। 2 P. पदत्वतया। 3 P. कृत्वात्मानं 4 P. add. अथवा लघूकृतस्त्वमिति विधेयम्। तदा वामनं तत्प्राप्तये बलियाचनेन लघूकृतस्त्वमामनन्ति — व्याख्या। व्यतिरेकः काव्यलिङ्गं वा ॥ ८४ ॥

1. P. याने। 2 P. ऽत्रपि int. lin. mg. add. प्रणमसि 3 P. add. अत्र देवानां भैम्याश्च नतिक्रियासम्पादनद्वारेण परस्परं जनकत्वादर्शनादन्योन्यम् ॥८५॥

सर्ग ६ 47

[इत्युक्तवत्येति। पारिजातस्य स्रक् माला मरुत्वतः आशां मनोरथम् ऋते विना वासैः परिमलैः कृत्वा अशोभाम् आशां दिशम् अपूपुरत्[3]। किं भूता? इति उक्तवत्या दूत्या[4] आदरेण निहिता अर्पिता तथापि भैम्या गृहीता न। कथं गृहीता? इयं मघवतो महेन्द्रस्य प्रसादोऽनुग्रहो न प्रत्याख्येयः। ततो नत्वा गिराशे जात[6]॥८६॥]

आर्ये! विचार्योऽलमिहेति काऽपि योग्यं सखि! स्यादिति काचनाऽपि।
ओङ्कार एवोत्तरमस्तु वस्तु मङ्गल्यमत्रेति च काऽप्यवोचत्॥८७॥

[आर्ये[1] विचार्येति। काऽपि[2] सखी इति अवोचत्। हे आर्ये! इह इन्द्रप्रार्थने सति विचार्यं अलं पर्याप्तम्। काचनाऽपि इत्यवोचत्। हे सखि! इदं कार्यं योग्यं स्यात्। काऽपि इति च अवोचत्। यदत्र कार्ये ओङ्कार एव अङ्गीकार एव उत्तरं मङ्गल्यम् वस्तु अस्तु। इदमेवोत्तरं युक्तम्[3]॥८७॥]

अनाश्रवा वः किमहं कदापि वक्तुं विशेषः परमस्ति शेषः।
इतीरिते भीमजया न दूतीमालिङ्गदालिङ्ग्य मुदामियत्ता॥८८॥ त्वी

[अनाश्रवा[1] व इति। भीमजया[2] इति ईरिते सति मुदां हर्षाणाम् इयत्ता न दूतीम् आलिङ्गत्। आलिङ्ग्य सखीं च न मुदाम्

1 P. इत्यु। 2 P. add. मघवत्प्रसादः 3 P. अपूरयत 4 P. om. दूत्या 5 P. add. आदरेण 6 P. add. काव्यलिङ्गम्॥८६॥
1 P. om. आर्ये विचार्येति। 2 P. काचित् 3 P. add. काचित् काचन काऽपीति न विकृतत्वम्। अनुप्रासः तुल्ययोगिता च॥८७॥
1 P. अनाश्रवेत्यादि। 2 P. भीमभुवा

सर्ग ६ 48

इयत्ता आलिङ्गात अपि तु अतिशायी हर्षो बभूव। इतीति। किमिति हे सख्यः! अहं किं कदापि वो युष्माकम् अनाज्ञया अवचनकरी[3]?। सर्वथा[4] भवतीनां भणितं करोमि। परं वक्तुं कश्चिद्विशेषः शेषोऽस्ति वक्तव्यशेषमस्ति। ततो दूत्या सखीभिश्च[6] विज्ञातम्। यदियमिन्द्रं वरिष्यति ततो हर्षो जनि[7]॥८८॥

भैमी च दूत्यं च न किञ्चिदापमिति स्वयं भावयतो नलस्य।
आलोकमात्राद्यदि तन्मुखेन्दोरभून्न भिन्नं हृदयारविन्दम् ॥८९॥ ॥भि

[ भैमी[1] च दूत्यं चेति। नलस्य हृदयमेव अरविन्दं[2] कमलं यदि न भिन्नं न स्फुटितम् अभूत् तदा तस्या मुखेन्दोः आलोकमात्रात्। अन्य च चन्द्रालोकात् कमलं न विकसति। किं कुर्वतः? स्वयम् इति भावयतः चिन्तयतः[4]। इतीति किम्? अहं भैमीं च दूत्यं च न किञ्चित् आपम्[5]। उभयमपि गतम्। दूतत्वं दूत्या कृतं, दमयन्त्या इन्द्रस्य माला स्वीकृता। तत[6] इन्द्रो वृतः[7]॥८९॥]

~~सस्मितया~~ ईषत्स्मितआलिङ्गितसृक्वभागा[1] भ्रूसंज्ञया वारिततच्चलालिः।
स्रजा नमस्कृत्य तथैव शक्रं तां भीमभूरुत्तरयां बभूव ॥९०॥

[ ईषत्[1]स्मितेति। भीमभूः तां दूतीम् उत्तरयां बभूव। किं

वा/ 3 P2 ०कारिणी 4 P2 सर्वथा 5 P1 परं 6 P2 इति सातम् 7 P1 add. अनुप्रासः॥८८॥ 1 P1 भैमी। 2 P1 add. कमलं 3 P2 om. न 4 P1 om. चिन्तयतः 5 P2 आप 6 P1 नादिन्द्रो 7 P1 add. तुल्ययोगिता॥ रूपकं ॥ प्रतीयमानोत्प्रेक्षा हेतु। भिन्नमिति च श्लिष्टम् ॥८९॥

1 P2 text इष० 2 P1 ईषत्स्म।

सर्ग ६ 49

कृत्वा। त्वयैव स्रजा शक्रं नमस्कृत्य। कथंभूता। ईषत्स्मितेन आकृतः सूक्ष्मभागो यस्याः सा तथा। तथा प्रसंज्ञया वारिता निषिद्धा सा सा आलिः सखी यथा। इन्द्रनमस्कारेणैव दृष्टा ख्यातं यदिन्द्रो निराकृतः॥१०॥

---

स्तुतौ मघोनस्त्यज साहसिक्यं वक्तुं कियत्तं यदि वेद वेदः।
मृषोत्तरं साक्षिणि हृत्सु नृणामसात्म्यविसादृपि ममाऽपि तस्मिन्॥११॥

---

[स्तुतौ मघोन इति। हे इति। त्वं मघोन इन्द्रस्य स्तुतौ साहसिक्यं त्यज। तम् इन्द्रं कियत् स्वल्पमपि वक्तुं स्तोतुं यदि वेद जानाति तदा वेद एव नान्यो जानाति। तस्मिन् इन्द्रे ममाऽपि उत्तरदानं मृषा निरर्थकम्। यतः किं भूतो। नृणां हृत्सु साक्षिणि चित्तसे। किं भूतम् उत्तरम्। असात्म्य विसापयतीत्येवंशीलम्। उत्तरदानेन अशातं साप्यते न तु इन्द्रः॥११॥]

---

आसां तदीयामनु कस्य नाम नकारपारुष्यमुपैति जिह्वा।
प्रह्वा तु तां मूर्ध्नि विधाय मात्तां बालाऽपराध्यामि विशेषवाग्भिः॥१२॥

---

[आसां तदीयामिति। तदीयामिन्द्रसम्बन्धिनीम् आज्ञाम् अनु लक्षीकृत्य नकारपारुष्यं निषेधेन कठोरत्वं कस्य नाम जिह्वा उपैति। तु पुनरहं बाला तां मात्तां मूर्ध्नि विधाय प्रह्वा सती विशेषवाग्भिः अपराध्यामि। बालस्य किल वाचालतान्चापल्येन गणनीयम्[2] ॥१२॥]

---

2 P. ईषत्स्वल्पं यथा भवति एवं स्मितेन 3 P. दृष्ट्वा लापितं 4 P. add. परिकरः॥ ॥१०॥
ति/ 1 P. स्तुतौ। 2 P. इन्द्रः 3 P. जानाति नान्यः 4 P. add. विषये 5 P. निरर्थकं मृषा
6 P. om. नृणां 7 P. असातं 8 P. add. अनुप्रासोऽपि परिसंख्या हेतुश्च॥११॥
1 P. आसां तदीया। 2 P. add. अनुप्रासो व्यतिरेको हेतुश्च॥१२॥

सर्ग ६ 50

तपःफलत्वेन हरेः कृपेयमिमं तपस्येव जनं नियुङ्क्ते ।
भवत्युपायं प्रति हि प्रवृत्तावुपेयमाधुर्यमधैर्यसर्जि ॥९३॥

[1]तप इति। इयं हरेरिन्द्रस्य कृपा मयि अनुकम्पा इमं मल्लक्षणं जनं तपस्येव नियुङ्क्ते। पुनस्तप एव कारयति। केन? तपसः फलत्वेन। जन्मान्तरे कृतस्य तपसः फलं हरेः कृपा। हि यस्मात्[2] कारणात् उपेयस्य साध्यस्य फलस्य माधुर्यं स्वर्गादेस्स्वादुता उपायसाधनम्[3] अग्निष्टोमादिकं प्रति[4] प्रवृत्तौ अधैर्यसर्जि अविश्वासकारि भवति। प्रवर्तमानस्याऽऽत्मनि प्रवर्तमानदशायामेव फलस्य अप्रत्यक्षता अनुभवविषयत्वाभावात्। इयं तु कृपा तपसः फलत्वेन प्रत्यक्षेणाऽनुभूता। इदं तपो मम समीहित साधनमिति प्रवर्तमानायां मम तपः प्रति प्रवृत्तौ धैर्यं सृजति। अतो विश्वासात् तपस्येव नियुङ्क्ते। अथवा उपेयस्य साध्यस्य माधुर्यं नाम रमणीयम्। प्रवृत्तौ फलस्य प्रवर्तने सति[6] प्राप्तकाले उपायं प्रति व्यर्थे अधैर्यम् अधीरत्वं सृजतीत्येवंशीलं भवति। येन तपसा उपा(40b)येन साधनेन[7] ईदृशं कृपालक्षणं साध्यं फलं प्रवृत्तं तस्य तपसो व्ययः कथं क्रियते। तस्मादहं[8] तप एव चिनोमीति ॥९३॥

व्य/

शुश्रूषिताहे तदहं तमेव पतिं मुदेऽपि व्रतसम्पदेऽपि ।
विशेषलेशोऽयमदेवदेहं प्रागतं तु क्षितिभृत्तयेह ॥९४॥

[1]शुश्रूषिताहे इति। तत्तस्मादहं तमेव[2] इन्द्रं प्रति शुश्रूषिताहे। किमर्थम्? मुदेऽपि हर्षाय च। व्रतसम्पदेऽपि तपःसम्पत्तौ च।

1 P. तपःफलत्वे। 2 R om. कारणात् 3 P. उपरि 4 P. प्रवृत्त्येति 5 P. om. प्रति 6 R सति twice 7 P. om. साधने 8 P. add. अनुप्रासोऽर्थान्तरन्यासश्च ॥९३॥

1 P. om. शुश्रूषिताहे इति। 2 P. om. एव

सर्ग ६ 51

तु पुनरवं क्षोभस्य लेशोऽस्ति स्वल्पो विशेषः यत् तम् इन्द्रम् अदेवदेहं मनुष्यं शुश्रूषिष्यो[3] तथा अतिथित्वया राजत्वेन इह पृथिव्यां अंशेन आगतं नलरूपतया आगतम् । नलो हीन्द्रस्यांशः[5] ॥ ९४ ॥

अश्रौषमिन्द्रादरिणी गिरस्ते सतीव्रतातिप्रतिलोमतीव्राः ।
स्वं प्रागहं प्रादिषि नामराय किं नाम तस्मै मनसा नराय ॥ ९५ ॥

[अश्रौषमिति[1] । अहम् इन्द्रविषये आदरिणी सती आदरपरा सती ते तव गिरः श्रौषम् । किंभूताः? सतीव्रतस्य अतिप्रतिलोमाः[2] प्रतिकूलाः अत एव तीव्राः । यतोऽहं स्वम् आत्मानं प्राक् पूर्वमेव तस्मै इन्द्राय अमराय न प्रादिषि न[3] दत्तवती । किं नाम किं पुनस्तस्मै नराय मनुष्याय राजरूपाय । अतोऽहमिन्द्रादरिणी एव । वाचस्तु सतीत्वप्रतिलोमाः । एकयोरेकत्वे[4] नराय नलाय[5] ॥ ९५ ॥]

तस्मिन् विमृश्यैव कृते हृदैषा मैन्द्री दया मामनुतापिकाऽभूत् ।
निर्वातुकामं भवसम्भवानां धीरे सुधानामवधीरणेव ॥ ९६ ॥

तस्मिन्नित्यादि[1] । हे दूति! मया तस्मिन्नले हृदा चेतसा विमृश्यैव कृते सति [ऐन्द्री] इन्द्रसम्बन्धिनी [एषा] दया[4] मामनुतापिकाऽभूत् । इन्द्रेण यत्प्रार्थिताऽहं तत्र मम पश्चात्तापो नास्ति । यथा

3 B2 शुश्रूषे M P1 add. साहं स्मृहशंसि (पा° iii 57) त्यात्मनेपदम् । 5 P1 add. अनुप्रासो व्यतिरेको हेतुश्च ॥ ९४ ॥

1 P1 अश्रौषा 2 B2 ल्लोला 3 B2 om. न दत्तवती M P2 दत्तेन 5 P1 add. अनुप्रासो हेतुश्च परिसङ्ख्याव्यतिरेकावपि ॥ ९५ ॥ // 1 P1 तस्मि ; P2 तस्मिन् विमृश्यैति । 2 P1 P2 om. ऐन्द्री ; ed. add. ऐन्द्री 3 P1 P2 om. एषा ; ed. add. एषा
4 B मया

सर्ग ६ 52

भव[सम्भवाना] सांसारिकाणां सुखानाम् अवधीरणा अवगणना मिवा-
लुकामं मुमुक्षु योगिनं धीरं विद्वांसमनुतापिका न भवति। उपमाहेतुश्च॥
॥८६॥

वर्षेषु यद्भारतमार्यधुर्याः स्तुवन्ति गार्हस्थ्यमिवाश्रमेषु।
तत्राऽस्मि पत्युर्वरिवस्ययैव शर्मोर्मिकिर्मीरितधर्मलिप्सुः॥८७॥

वर्षेष्वित्यादि। आर्यधुर्याः विद्वांसो वर्षेषु जम्बूद्वीपेषु
खण्डेषु मध्ये यद्भारतं वर्षं स्तुवन्ति। यथा आश्रमेषु ब्रह्मचर्याश्रमेषु। षु
मध्ये गार्हस्थ्यं स्तुवन्ति। यस्मात् त्रयोऽप्याश्रमिणो ज्ञानेनाऽन्नेन
चान्वहम्। गृहस्थैरेव धार्यन्ते (मनु० III-78)॥ तस्मात् तेषु आश्रमेषु मध्ये
गृहस्थाश्रमो मुख्यः सर्वोपजीव्यः। तत्र भारते वर्षे [इह] लोके पत्यु-
र्वरिवस्यया परिचर्यया शर्मणः सुखस्योर्मिभिः किर्मीरितो यो
धर्मः तं लिप्सुर्लब्धुमिच्छुरहमस्मि। जम्बिन्द्रस्योपासनात् श्यो
शर्म एव केवलमधुना नरेन्द्रस्योपासनात् शर्मादिकं सर्वम्। [धुरो
यड्ढकौ चेति (पा IV iv 77) इति यत्]॥८७॥

स्वर्गे सतां शर्म परं न धर्मा भवन्ति भूमाविह तच्च ते च।
शक्या मुक्तेनाऽपि मुदेऽमराणां कथं विहाय त्रयमेकमीहे॥८८॥

स्वर्गे सतामित्यादि। स्वर्गे सतां विद्यमानानां महात्मनां परं

5 B1 P1 संसारि 6 P2 ०धीरणी 7 P2 om. कामं 8 P2 om. उपमा हेतुश्च॥८६॥
1 P1 वर्षे। P2 वर्षेषु आदीति। 2 P2 सर्वेषु 3 B ०द्वीपेषु 4 P2 om. यस्मात्
....मध्ये 5 B ०श्रमा 6 B P1 P2 जनेनाऽन्ने 7 P1 ०श्चाश्रमो गृहीति
गृहस्था 8 P2 ततो 9 B अस्य; P1 जम्बिन्द्र० 10 P1 P2 om. अधुना....सर्वम्
11 P1 add. अनुप्रास उपमा च॥८७॥ 1 P1 स्वर्गे —

केवलं शर्म [भोगः] सुखमेव न तु धर्माः। धर्मा अपि पूर्वदत्ता भवन्ति। भूमौ पुनरिह च तद्धर्म [ते][2] च धर्माश्च भवन्ति। [धर्मा] इति पूर्वदत्तलक्षणा एवात्र[3] अभिप्रेताः। इन्द्रस्य तृतीयपादे वक्ष्यमाणत्वात्। तस्य चाऽयमर्थः। इन्द्रपरणे इन्द्रस्यैकस्यैव मुदो न पुनरन्येषां देवानाम्। भूमौ तु मखेन सर्वेषाममराणां मुदोऽपि शक्याः॥

यदाह – मनुष्याणां चारम्भसामर्थ्यात् ( ! ) इति। अतस्त्रयं[4] [विहाय] कथमेकमीहे। केचन[6] पुनर्व्याचक्षते – अमराणां देवानां मुदो शर्म [मखेनाऽपि] यज्ञेनाऽपि शक्याः। इन्द्रपरणे[7] देवानां मुदः यशैश्च। अतो मुदां साधारणत्वम्। अहं तत्त्रयं देवमुदं धर्मं शर्म च पृथिव्यां विहाय सर्वे धर्मशर्मिणोः[8] एकं शर्म कथमीहे। द्वयमिति पाठो[9] वा द्वयं [धर्म] शर्म च विहाय एकं सुखं कथमहमिच्छामि[10]। अनुप्रासः समुच्चयः [च]॥९८॥

साधोरपि स्वः खलु गामिताधो गामी[1] स तु स्वर्गमितः प्रयाणे।
इत्यायति[2] चिन्तयतो हृदि द्वे द्वयोरुदर्कः किमु शर्करे नः॥९९॥

साधोरपी[3]त्यादि[4]। साधोरपि [स्वः] स्वर्गाधिपतेरिन्द्रस्य खलु अधो लोके गामिता[5] स तु पुनः साधुः इतो भूलोकात् प्रयाणे स्वर्गं गामी[5] गन्ता इति[6] प्रकारेण द्वयोर्भूस्वर्गयोरायतिमुत्तरकालं

2 B om. धर्मा ... °मेकमीहे 3 P1 om. अत्र 4 B यज्ञ° 5 B अत्र स्वयं
6 P2 किञ्च अमराणां 7 B इन्द्रा°; P2 om. इन्द्र°... यशैश्च। 8 P2 शर्मिधर्मिणोः
9 P2 पाठो रम्यः 10 P1 अहं कथम् 11 P2 om. अनुप्रासः समुच्चयश्च॥९८॥
1 P2 text गामी 2 P2 text व्यती 3 P1 साधोरपि; P2 साधोरपीति।
4 P2 गामिता 5 P1 P2 गामी 6 P2 गमिष्यति

सर्ग ६ 54

हृदि चिन्तयतः।[7]किंनु द्वे शर्करे न [8]समम् उद्धर्के:।[9]स्वर्गस्य उत्तरफलं [शर्करा। अधोगमनात् सिकता वालुका भुवस्तु उत्तरफलम्]। खण्ड-शर्करा स्वर्गः।[10]अनुप्रासो रूपकमुत्प्रेक्षा इत्यन्यः। शर्करे इति क्लिष्टम्॥९९॥

प्रक्षीण एवाऽऽयुषि कर्मकृच्छ्रेर्नरान्न तिष्ठत्युपतिष्ठते यः।
बुभुक्षते नाकमपथ्यकल्पं धीरस्तमापातसुखोन्मुखं कः॥१००॥

[1]प्रक्षीण] एवेत्यादि। को धीरो विद्वान् [तम्][2] आपात-सुखोन्मुखं तत्कालरम्यं परिणामविरसं नाकम् अपथ्यसदृशं बुभुक्षते। यः स्वर्गः प्रारब्धकर्मणः कृच्छ्रेः इत्यात् प्रकर्षेण क्षीणे तु। क्षयिते एवाऽऽयुषि जीविते। कर्मणः सुकृतादेः[3] कृच्छ्रेः कर्षणात् नरानुपतिष्ठते [उपस्थास्यति]। उपान्मन्त्रकरणे(पा० I.iii.25)[4] (वा०(23))
पृष्ठ इत्यत्र उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिष्विति वक्तव्यमुक्तम्। सङ्गतिकरणमुपश्लेषः[5]। मित्रकरणं विनापि उपश्लेषेण मैत्रीसम्ब-न्धः। मित्रकरणे महामात्रानुपतिष्ठते। न तिष्ठति आयुषि उपतिष्ठ-ते स्वर्गः। यथा अपथ्यं कर्म कृच्छ्रेः कर्मवशात् प्रक्षीणे आयुषि नरानुपतिष्ठते न तिष्ठति सति[6]। आयुषि तदपथ्यं तत्कालरम्यं को भोक्तुमिच्छति।[7]भुजोऽनवने(पा० I.iii.66) इत्यात्मनेपदम्[8]। धर्म-पथ्यर्थन्यायादनपेते (पा० IV.iv.92) इति यत्। अनुप्रास उपमा च॥१००॥

7 B किंस्वे हृदि 8 P₁P₂ om. न समं 9 P₁ om. स्वर्गस्य; P₂ add. उत्तरफलं न भवति। 10 P₂ om. अनुप्रासो.... क्लिष्टम्॥९९॥
1 P₁ प्रक्षीण।; P₂ प्रक्षीण एवेति। 2 B P₂ om. तं 3 B सुकृतस्य 4 P₂ om. उपान्मन्त्रा०....नुपतिष्ठते। इ; but P₁P₂ add. सङ्गतिकरणेऽप्यात्म-नेपदम्। यथा गङ्गा यमुनामुपतिष्ठते 5 B P₁ P₂ सङ्गत०; e.g. सङ्गति० 6 P₁P₂ om. सति 7 P₂ om. भुजो०...पदम् 8 P₂ om. अनुप्रास उपमा च॥१००॥

इतीन्द्रदूत्यां प्रतिवाचमर्धे प्रत्यूह्य सैषाऽभिदधे वयस्याः।
किञ्चिद्विवक्षोल्लसदोष्ठलक्ष्मीजितापनिद्रद्दलपङ्कजास्या॥१०१॥

इतीन्द्रदूत्यामित्यादि[1]। सा एषा दमयन्ती वयस्याः सखीरभिदधे[2]। किं कृत्वा? इति प्रकारेण इन्द्रदूत्यां विषये प्रतिवाचं प्रतिवचनम् अर्धे अर्धोक्तमेव प्रत्यूह्य स्थापयित्वा। किंविशिष्टा सखी? किञ्चिद्विवक्षया उल्लसन्ती या ओष्ठयोर्लक्ष्मी-स्तया जितमपनिद्रद्दलं[3] विकसद्दलं पङ्कजं येन [4]तत्तथाविध-मास्यं यस्याः सा तथा। उपमा॥१०१॥

अनादिधाविश्वपरम्परायां हेतुस्रजः स्रोतसि वेश्वरे वा।
आद्यन्तधीरेष जनस्तदार्याः! किमीदृशः पर्यनुयुज्य कार्यः॥१०२॥

अनादीत्यादि[1]। हे आर्याः! सख्यः! एष मल्लक्षणो जनः अनादिधा बीजाङ्कुरन्यायेन नित्या या विश्वपरम्परायाः स्रोतसि प्रवाहे आद्यन्तधीः[2] परतन्त्रबुद्धिः। न स्वतन्त्र इति मीमांसकाः स्वभाववादिनश्च[3]। अनादिरेव अनादिधा[4]। तथा एष जनो हेतुस्रजः कारणमालायाः प्रवाहे आद्यन्तधीः [पूर्व]पूर्वशुभाशुभैः कर्मभिः कारणैः उत्तरोत्तरं जन्म प्राणिनां न स्वतन्त्राम् इत्यदृष्टकारण-वादिनो नैयायिका मीमांसकाश्च। ईश्वरे वा आद्यन्तधीः। ईश्वर-शब्देन मायाशबलं ब्रह्मोच्यते इति वेदान्तवादिनः। ~~अथवा~~ अथवा

1 l1 इतीति; l2 ०दूत्यामिति। 2 l2 lecto sup. lin. mg. a add. अभाषे = स्तोकं किञ्चिद्विवक्षया 3 l2 om. विकसद्दलं 4 l2 om. तत् 5 l2 om. उपमा॥१०१॥

1 l2 text ०विस्व० 2 l1 अना; l2 अनादिधेति। 3 l1 add. अपि; l2 वादिनश्च 4 l2 om. अनादिरेव अनादिधा

ईश्वरोऽशरीरी जगत्कर्ता इति नैयायिकाः। ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ( ) । ईदृशः[6] परतन्त्रो मत्तुल्यो भवतीश्वरः पर्यनुयुज्य पूर्वपक्षं कृत्वा किं कार्यः ? । न किमपि । [7]मम परतन्त्रायाः पार्श्वात्[8] कारितव्यम्[9] । विश्वपरम्परायामिति मुख्यपाठः । विश्वपरम्परायामायत्तधीः । [10]अनुप्रासो हेतुः समुच्चयश्च ॥१०२॥

---

नित्यं नियत्या परवत्यशेषे कः संविदानोऽप्यनुयोगयोग्यः ।
अचेतना सा च न वाचमर्हेद्वक्ता तु वक्त्रश्रमकर्म भुङ्क्ते ॥१०३॥

---

[1]नित्यमित्यादि । हे सख्यः ! नित्यं नियत्या अशेषे जगति परवति परतन्त्रे सति कः संविदानोऽपि[2] अविवक्षितकर्मकः । जानन्नपि अनुयोगस्य पूर्वपक्षस्य योग्योऽस्ति । अपितु नास्ति । त्वया अमुकमित्थं कथं न कृतमिति वक्तव्यं न[3] । यतो नियतिर्नाम ~~...~~ षड्विंशतितत्त्वान्तर्गतं[4] [तत्त्वं] शैवानामागमोक्तम् । तदायत्तं सर्वमिति ते वदन्ति । सा[5] तर्हि नियतिरूपा लभ्यत इत्यत आह - सा च नियतिरचेतना सती न वाचमुपालम्भमर्हति[6] । तु पुनर्वक्ता उपालम्भदाता तां नियतिं प्रति केवलं वक्त्रश्रमकर्म भुङ्क्ते । केवलं[7] मुखश्रमो भवति । समो गम्यृच्छि[प्रच्छि]स्वरत्यर्तिश्रुविदिभ्यः ( ) इत्यात्मनेपदम् । भावः । [8]अनुप्रासो हेतुर्विरोधश्च ॥१०३॥

---

5 P2 च 6 B ईश्वरशब्दः 7 P2 om. मम 8 B सकाशात् 9 B कर्तव्यम्; P2 कारयितव्यम् 10 P2 om. अनुप्रासो हेतुः समुच्चयश्च ॥१०२॥

1 P1 नित्यं; P2 नित्यं नियत्येति । 2 BP1 add. वेत्ति 3 P1 om. न; P2 न वक्तव्यम् 4 P1P2 ०त्रिंशत् 5 P1P2 तर्हि सा 6 P1 ०मर्हति 7 P1P2 om. केवलं 8 P2 om. अनुप्रासो हेतुर्विरोधश्च ॥१०३॥

क्रमेलक निन्दति कोमलेच्छु: क्रमेलक: कण्टकलम्पटस्तम् ।
प्रीतौ तयोरिष्टभुजो: समायां मध्यस्थिता नेकतरोपहास: ॥१०४॥

क्रमेलकमित्यादि[1] । कोमलेच्छु: क्रमेलकम् उष्ट्रं निन्दति[2] । क्रमेलक: कण्टकलम्पट: तं कोमलभक्षकं निन्दति । उदासीनेन तटस्थेन पुरुषेण तयोर्द्वयोरपि स्वकीयं [स्वकाय इष्टे][3] कोमलं वा कण्टकं वा[4] भुक्तवतो: समायां प्रीतौ सत्यां मध्यस्थिता औदासीन्यं कर्तव्यम् । [न] एकतरस्यापि उपहास: कर्तव्य: । ततो भवतीभिर्मम वरवरणे औदासीन्यं कर्तव्यम्[5] ॥१०४॥

गुणा हरन्तोऽपि हरेर्नरं मे न रोचमानं परिहारयन्ति ।
न लोकमालोकयथापवर्गात् त्रिवर्गमर्वाञ्चममुञ्चमानम् ॥१०५॥

गुणा इत्यादि[1] । हरेरिन्द्रस्य गुणा [redacted] मुनोः हरन्तोऽपि मे मह्यं रोचमानम् अभिरुचिरं[2] नरं मनुष्यं न परिहारयन्ति[3] ।[4] अतोऽयमर्थ: । हे सख्य: ! यूयं लोकं नापलोकयथ कथं न पश्यथ । किंभूतं लोकम् ? । अपवर्गान्मोक्षात् अर्वाञ्चम् अवकृष्टमपि त्रिवर्गं धर्मार्थकामलक्षणम् अमुञ्चमानम् । यद्यपि मोक्ष उत्कृष्टस्तथापि कर्ममार्गे त्रिवर्गेऽपि लोकस्याभिरति: । अनुप्रासो[5] वि(105b)-रोधोऽर्थान्तरन्यासश्च विशेषोक्तिर्वा ॥१०५॥

1 P₁ क्रमेलकं ; P₂ क्रमेलकमिति । 2 P₁ P₂ कण्टकेषु 3 P₂ om. स्वकाय M. P₁ om. वा 5 P₁ add. काव्यलिङ्गम् ॥१०४॥

1 P₁ गुणा ; P₂ गुणा उरन्तोऽपीति । 2 B° रुचितं 3 B °हरयन्ति 4 P₂ lecto. int. lin. mg. add. न त्याजयन्ति 5 P₁ add. अपकर्षे उत्कर्षे ॥ P₂ om. अनुप्रासो ... विशेषोक्तिर्वा ॥१०५॥

सर्ग ६ 58

आकीटमाकैटभवैरि तुल्यः स्वाभीष्टलाभात् कृतकृत्यभावः।
भिन्नस्पृहाणां प्रति चार्थमर्थं द्विष्टत्वमिष्टत्वमपव्यवस्थम् ॥१०६॥

[1] आकीटेत्यादि। हे सख्यः! आकीटं कीटमात्रात् प्रभृति तथा आकैटभवैरि श्रीकृष्णं यावत् स्वस्य स्वस्याभीष्टलाभात् सर्वेषामपि कृतकृत्यभावस्तुल्यः। यादृशो [2] विष्णोः कृतार्थभावः [3] कीटस्याऽपीच्छालाभे तादृगेव। भिन्नस्पृहाणां पुरुषाणाम् अर्थमर्थं प्रति द्विष्टत्वमिष्टत्वं चापगता [4] व्यवस्था नियमो यस्य तत्तथा। यदेकस्येष्टं तन्नियमेनाऽपरस्याऽपीष्टमिति न नियतम्। किन्तु [अ]नियतम्। यथा उक्ता कामिनी कामिन इष्टा, सैव परिव्राजकस्य द्विष्टा। तस्मादहमा[त्मा]भिलषितं [वरं] वरिष्ये। [8] अनुप्रासोऽर्थान्तरन्यासश्च ॥१०६॥

[1] अग्रागजाग्रन्निभृतापदन्धुर्बन्धुर्यदि स्यात्प्रतिबद्धुमर्हः।
शेषं जनः कार्यविदस्तु वस्तु प्रच्छन्नया निजेच्छया पदवीं मुदस्तु ॥१०७॥

[2] अग्रागजे [इ]त्यादि। यो बन्धुरग्रेऽग्रे जाग्रती निभृता आपदेवाऽन्धुः कूपो यस्य स तथाविधो बन्धुर्यदि स्यात् तत्तः प्रतिबद्धुं [मां] निषेद्धुम् अर्हो [3] योग्यो भवेत् [4]। अनिष्टशङ्कीनि बन्धुहृदयानी( ? ) इति न्यायादिदं कार्यं कुर्वतोऽस्य इयमापत् भविष्यति इति शङ्कते यो बन्धुः स निवारयितुं [5] योग्यः। स्वजनस्य

1 P. आकी।; P2 आकीटमाकैटभेति। 2 B. यादृशो 3 P. कीटकस्याऽपि 4 P2 om. इष्टत्वम् 5 B नियतिः 6 B तथा 7 P2 वरयिष्ये 8 P2 om. अनुप्रासोऽर्थान्तरन्यासश्च ॥१०६॥ 1 P2 त्यां अध्याय 2 P. अग्रागो।; P2 अग्रागजाग्रदिति। 3. P. अर्हो योग्या 4 P. भवति 5. P/P2 निवारयति स्वजनं

कार्यवित् युष्मादृशो जनः सखी जिह्मेक्षणो जोऽजमस्तु तूष्णीं भवतु। यूयं कार्यं जानीथेति भावार्थः। मम नलेऽनुराग इति[ ]। ततोऽहं न वारणीया। तु पुनर्मुदो हर्षस्य पदवीं वस्तु मया निजेच्छा प्रच्छ्या। [7]पृच्छ्या इति पाठे पृच्छनीयामिति]वत् कठित्वात् सम्प्रसारणम्। यत्र मम [10]अस्त्विदं करिष्यामि [11]आत्मनस्तुष्टिरेव च (मनु० म० ५) इति धर्मसन्देहे मनुस्मरणात्। अनुप्रासो रूपकं काव्यलिङ्गं च[12] ॥१०७॥

---

इत्थं प्रतीपोक्तिमतिं सखीनां विलुप्य पाण्डित्यबलेन बाला।
अपि श्रुतस्वर्पतिमन्त्रिसूक्तिं दूतीं बभाषेऽद्भुतलोलमौलिम् ॥१०८॥

---

[1]इत्थमित्यादि। सा बाला इत्थं सखीनां प्रतीपोक्ति[2]मतिं प्रतिकूलवचनबुद्धिं पाण्डित्यबलेन शास्त्रयुक्ति[3]नीतिबलेन विलुप्याऽद्भुते स्थापितामिन्द्रदूतीं पुनर्बभाषे। किं भूतामीं अद्भुतेन लोलमौलिम्। किंभूताम्?। अपि [4]श्रुता [5]स्वर्पतेर्मन्त्रिणो बृहस्पतेः सूक्तिः सुभाषितं यया तां तथाविधामपि। साश्चर्यम्। [6]अनुप्रासो [7]व्यतिरेकश्च ॥१०८॥

---

परेतभर्तुर्मनसेव दूतीं नमस्यतेवाऽनिलसख्यभाजः।
त्रिस्रोतसेवाऽम्बुपतेस्त्वदाशु स्थिरास्थमायातवतीं निरास्थम् ॥१०९॥

---

[1]परेतभर्तुरित्यादि। हे दूति! अहं परेतभर्तुः दूतीं निरास्थं

---

6 P. P2 om. इति भावार्थः 7 B अतो० 8 P. P2 पृच्छ्या। 9 P2 om. पृच्छ्या इति ..... सम्प्रसारणम्। 10 P2 om. त्वदहं 11 P2 om. अनु० .... च॥ 12 P. om. च ॥१०७॥ 1 P. इत्थं। P2 इत्थं प्रतीपोक्तिमतिमिति। 2 B ०पोक्ति० 3 B ०नीतियुक्ति० P2 युक्तिमति० 4 B श्रुत्वा 5 P. P2 स्वः पते० 6 P. om. अनुप्रासो व्यतिरेकश्च॥ 7 P. विरोधश्च ॥१०८॥ 1 P. परेत; P2 परेतभर्तुरिति।

निराकृतवती। अस्यतेस्थोऽन्त (का० III.VI.95) इति थकारागमः। तदाऽऽ-[2]गमनक्षण एव स्थिरा आस्था यत्र तद्[3]यथा भवति तथा आयातवतीमपि। कथं निरास्थम्?। आशु वेगेन शीघ्रम्। केनेव?। मनसा इव निरास्थम्। यथा मनोऽस्थिरं तथा वेगेन निराकृता। यतः प्रेतानां भर्ता। परेतानां[4] किल मनोऽस्थिरं तथा आशु गच्छति। तथा अनिलसख्यभाजो [वह्नेः] दूतीं नभस्वता इव आशु निरस्तवती[5]। वायुरस्थिरो भवति। अम्बुपतेरपि दूतीं निरास्थं निरस्तवती[6]।। त्रिस्रोतसा इव निराचकाराऽऽशु[7]। यथा गङ्गा त्रि(105 ब)भिः प्रवाहैर्वहति तथा निरास्थम्। अथवा, एकैकां[8] दूतीमहं निरास्थम्। किंभूताम्?। मनसेव दूतीम्। यथा मनःकल्पिता दूती मिथ्या भवति। प्रेतानां हि मन एव न तु शरीरम्। द्वितीयां नभस्वता इव दूतीम्। यथा वायुमयी दूती मिथ्या, न तु पारमार्थिकी। यस्य[9] वायुना मैत्री तस्य दूत्याः कीदृक् प्रामाण्यम्?। तृतीयां त्रिस्रोतसा इव दूतीम्। यथा प्रवाहेन दूतीं न किञ्चित् प्रमाणरूपां तथा त्रयमपि निरास्थम्। दूतीत्रयं मनोराज्यरूपं वायुः पानीयं च भूत्वाऽऽगतम्। अथवा, मनःप्रभृतीनां त्रयाणामपि परेतभर्तादित्रितया[10]धीनत्वान्मनसा इव आशु आयातवतीं[11] नभस्वता वायुनेव[12] आयातवतीं निरास्थमहं निरास्थम्। अन्यस्तु निरास्थदिति पठन् व्याचष्टे — दूताराकीनाशजलेशदूतीर्निराकरिष्णोः (नै० VI.75) रित्युक्तम्। तन्निरा[15]करणार्थं कविराहेति। केचिन्निरास्थामिति पठित्वा दमयन्त्या वचनं कुर्वन्ति। तन्न सङ्गतम्। उत्प्रेक्षावाक्यस्य[16] सङ्घट्टनादिन्द्रदूतीं प्रति

---

2 B2 om. आगमनक्षण एव 3 B तथा 4 P2 परेतानां.....गच्छति om. तथा निरास्थम् 5 B तिरस्कुर्वती 6 P1 B2 om. निरस्तवती 7 P2 आशु निराचकार 8 P1 एकल्पितो 9 P2 यस्य.....प्रामाण्यम् om. भूत्वाऽऽगतम् 10 B1 तृतीया° 11 P2 ०वतीं स्थिरास्थम् अहं निरास्थम् 12 P1 add. आशु 13 P1 add. त्रिस्रोतसेव आशु आयातवतीं 14 B2 स्थिरास्थम 15 P1 किरणं 16 P1 वाक्यस्याघटनात्

[17]तन्निराकरणवचनस्य निरर्थकत्वात् इति चाह। तच्च विचार्यम्। यतो दूतीं बभाषे इत्युक्त्वा मध्ये कविरुक्तिः। उत्तरश्लोके च दमयन्त्या वचनं व्याक्रियते। इति किं केन सङ्गतम्। सम्भावने च किं नाम?। अधस्तनम् इन्द्रदूतीं प्रति अन्यनिराकरणवचनमुपोद्बलनार्थम्। अनुप्रास[18] उत्प्रेक्षा उपमाऽपि[19] ॥१०९॥

भूयोऽपि मेनं यदि मां त्वमात्थ तदा पदावालभसे मघोनः।
सतीव्रतैस्तीव्रमिमं तु मन्तुमन्तर्परं वज्रिणि मार्जितास्मि ॥११०॥

भूयोऽपि[1]मित्यादि। हे दूति! यदि त्वं मां भूयः पुनरपि एनमिन्द्रवरणलक्षणमर्थमात्थ वदसि तदा मघोनो महेन्द्रस्य पदौ[2] चरणौ आलभसे स्पृशसि। शपथोऽयं ते। तु पुनरिमं तीव्रं मन्तुमपराधं परमहम् अन्तश्चित्तमध्ये सतीव्रतैर्वज्रिणि विषये मार्जितास्मि। स्वस्तनी[3](का० III.i.30)। तास्मि। अपराधमार्जनं करिष्यामि। मन्तुम-दुर्धरमिति पाठे सतीव्रतैरदुर्धरं सुसहमिति योजना। अनुप्रासः[4]॥११०॥

वो/ इत्थं पुनर्मार्गावकाशनाशान्महेन्द्रदूत्यामपयातवत्याम्।
विवेश खेदं हृदयं नलस्य जीवः पुनः क्षीबमिव प्रबोधः॥१११॥

इत्थं पुनरित्यादि[1]। इत्थं शपथदानेन पुनरपि वाचो वचनस्य अवकाशनाशात् महेन्द्रदूत्यामपयातवत्यां सत्यां जीव आत्मा

17 I. om. तत् 18 I. अनुप्रासोत्प्रे० 19 I. च ॥१०९॥
1 I. भूयो।; I2 भूयोऽपि मिति। 2 B I2 पादौ 3 B निरस्ता०; I2 F स्वस्तनी 4 I2 om. अनुप्रासः ॥११०॥
1 I. इत्थं पु।; I2 इत्थं पुनरिति।

सर्ग ६ 62

नलस्य कोलं चञ्चलं हृदयं पुनर्विवेश। यथा प्रबोधः स्वानं जीवं मत्तं पुनरपि प्रविशति। अत्र [उप]जातिवृत्तम्। अनुप्रास उपमा।।१११।।

श्रवणपुटयुगेन स्वेन साधूपनीतं
दिगधिपकृपयाऽऽप्तादीदृशः संविधानात्।
अलभत मधु बालावाग्भवं इत्थमित्थं
निषधजनपदेन्दुः पातुमानन्दसान्द्रः।।११२।।

श्रवणेत्यादि। निषधजनपदेन्द्रो नल इत्थं बालाया। ... रणेण युक्ता या वाच इत्थम् इत्थानं यस्य तत्तथाविधं मधु आनन्दसान्द्रः सन् पातुमलभत। कस्मात्?। दिगधिपानां कृपयाऽऽप्तात् ईदृशात् तस्मात् संविधानात् दूतत्वकरणात्। किंभूतम्?। श्रवणपुटयुगेन उपनीतं साधु सम्यक् दमयन्तीवचनलक्षणं मधु शुश्राव। आनन्दा...। मालिनीवृत्तम्। अनुप्रासो रूपकं च।।११२।।

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
षष्ठः खण्डनखण्डतोऽपि सहजक्षोदक्षमे तन्महा-
काव्येऽयं व्यगलन्नलस्य चरिते सर्गो निसर्गोज्ज्वलः।।
।।११३।।

(105b) श्रीहर्षमिति। नलस्य महाकाव्येऽयं षष्ठः सर्गः व्यगलत्।

२ B om. पुनः 3 B प्रबोधे 4 B om. अत्र.... उपमा।।१११।। 1 B text ष्पदेन्दुः 2 P. श्रवणा; B श्रवणपुरेति। 3 B नैषध० 4 B युक्तो यो 5 B वचो 6 B om. आनन्दाङ्कं....रूपकं च।; 7 BP. मालती०; Edn. मालिनी० ।।११२।। 1 B text om. श्रीहर्ष... च यम्। 2 B text add. निषधप्रवेशो नाम।।६।। 3 P. om. श्रीहर्षमिति। 4 B कुमारोऽयम्। 5 P. om. अयं

किंभूते? । खण्डनखण्डतोऽपि ग्रन्थात् सहजा स्वभावत एव क्षोदक्षमे ।
अथवा किंभूतात्? । सहजात् भ्रातुः खण्डनमपि श्रीहर्षेण कृतम् । अतिविभ्रमम्[6] ॥११३॥

[1] [श्रीमानाल्हिगपण्डितः स्वसमयाविर्भूतसर्वाश्रम -
श्रीपाण्डूपण्डितसंस्तुतं प्रसुषुवे श्रीगौरिदेवी च यम् ।

किमपि मुकुरत्नं नागरश्रोत्रियाणां प्रतिनिधिरिव तेजःसद्मनः पद्मयोनेः ।
विधुरपरमसिन्धोराल्हिगो नाम श्रीमानिह समजनि पत्नी गौरिदेवीति चास्य ॥२॥

कलिकालाकुलां पुण्यलक्ष्मीं रक्षितुमिच्छता ।
प्राकारो विधिना योऽत्र विप्राकारो विनिर्मितः ॥३॥

तदात्मजस्ताल्हणनामधेयो विशारदः शारदचन्द्रकीर्तिः ।
महाक्रतौ ज्योतिषि कर्मकाण्डे क्रमाच्चतुःसंस्थतया प्रयोक्ता ॥४॥

सम्राट्स्थपत्यग्निचिदग्रजन्माग्रगण्यचाण्डूजनुषोऽनुजन्मा ।
त्रैविद्यवृद्धार्चितसर्वदेवबुधाग्रजन्मा महनीयजन्मा ॥५॥

6 B add. च ॥११३॥

1 B om. श्रीमानाल्हिग॰ ... शोधयति स्म टीकाम् ॥६॥

श्रीवैद्यनाथाभिधसूक्तदेवी-
पदप्रसादोपचितप्रसादैः।
पदैरुदारैर्विवृतप्रक्लृप्तां
क्वचित्क्वचित शोधयति स्म टीकाम्॥६॥

इति [1]महापण्डितश्रीचाण्डूविरचितायां
नैषध[दीपिकायां] टीकायां
[निषधप्रवेशो नाम]
षष्ठः सर्गः [समाप्तः][4]॥६॥

1 P2 om. महोपाण्डितश्रीचाण्डूपिराचितायां 2 P2 add. श्री० 3 P2 om. निषधप्रवेशो नाम 4 P2 add. ग्रन्थसङ्ख्या ५०३.